00047158

ORI
181.43
Sha/six
47158

THE
ASIATIC SOCIETY OF BOMBAY
Town Hall, Bombay.

Digitized with financial assistance from

on 10 July, 2018

E

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS.

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1226.

# SIX BUDDHIST NYĀYA TRACTS

IN

SANSKRIT.

47158
a




LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

EDITED BY
MAHĀMAHOPĀDHYĀYA HARAPRASĀD SHĀSTRI, M.A.,
*Vice-President, Asiatic Society of Bengal.*

33-f-87

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1910.

00047158

## PREFACE.

The six philosophical tracts of the Buddhists in Sanskrit included in this publication are—(1) Apohasiddhi, (2) Kṣaṇabhaṅgasiddhi, by direct method; (3) Kṣaṇabhaṅgasiddhi, by indirect method—all three by Ratna-Kīrti; (4) Avayavinirākaraṇa, (5) Sāmānyadūṣaṇa-dik-prasāritā, both by Paṇḍita Aṣoka; and (6) Antarvyāpti-Samarthana by Ratnākara Śānti. All these works are written in the philosophical language of the best period. It is a relief to read a book written in this style, after the diffuse and verbose works of early Būddhist Sanskrit literature. It is also a relief to read a book of this style, after the enigmatic and algebraical style of the modern Naiyāikas. These works will not lose by comparison with the best philosophical works of the Brāhmaṇas. They are short works and deal each with one topic only.

The first, Apohasiddhi, deals with the imports of words. The theory it propounds is that a word denotes something positive, and at the same time differentiates it from all others. The two acts, one positive and the other negative, are simultaneous. It is not a positive action followed by negation, nor is it a negative act followed by assertion.

In establishing this, the author refutes successively the theories of (1) Kumārila, (2) Trilocana, (3) Nyāyabhūṣṇa, (4) Vācaspati Miśra, and (5) Dharmottara.

This gives us some clue to his date. Kumārila preceded Saṅkarā-cārya by two generations, and Śaṅkara's date is fixed at about 800 A.D. Aufrecht mentions several Trilocanas. None of them appear to go beyond the Mahomedan conquest. Paṇḍit Vindhyeśvarīprasāda Dube, Librarian of the Benares Sanskrit College, says that Trilocana was the teacher of Vācaspati Miśra, for Udayana in commenting on that author's Nyāyavārttika-tātparya says, "अतिजरतीनामिति उद्योतकरसम्प्रदायोद्यभूषां यौवनम्; तच्च कालपरिपाकवशाद् गलितमिव, किं नामात्र त्रिलोचनगुरोः सकाशादुपदेशरसायनमासादितमभूषां पुनर्नवीभावाय दीयते इति युज्यते।" Trilocana is here said to be the Guru of Vacaspati. But there is another more explicit quotation. Vardhamāna in commenting on the above work of Vācaspati says, "सम्प्रदीयते इति सम्प्रदायो रहस्योपदेशः त्रिलोचनः टीकाकृतो विद्यागुरुः". This is the Trilocana mentioned here. Many Nyāyabhūṣaṇas are known: one is a commentary on Bhāsarvajña's Nyāyasāra, and the other a Mīmaṁsā work mentioned in page 6 of Bhāṇḍārkar's report for the year 1883-84. A third work, Kaṇāda Nyāyabhūṣaṇa, has recently been found in the collection of MSS. presented by Mahārājā Candra Samsher Jang Bahādur Rāṇā, Prime Minister and Commander-in-Chief of Nepal, to the Bodlian Library, Oxford. But none of these are applicable here. A fourth Nyāyabhuṣaṇa, a vṛtti on the Nyāyasūtras, is mentioned in pages 341, 351 and 353 of the Tārkikarakṣā and at the commencement of Dravyakiraṇāvalī, both printed at Benares. This seems to be the Nyāyabhuṣaṇa meant here. Vācaspati's date is Śaka 898. (See the appendix

to Nyāyavārtika. Bibl. Ind.) Dharmottara, whose commentary on Nyāya-vindu has been published by Dr. Peterson in the Bibl. Ind., has been placed by Dr. Satīśa Candra at about 847 A.D. from Tibetan sources. The author of Apohasiddhi is very bitter against Dharmottara, and he takes a good deal of pains in elaborately refuting the theory of Vācaspati Miśra. We can, therefore, safely place the author by the end of the tenth century. It is a significant fact that he does not quote or refute Udayana, whose date is Śāka 905 = 983 A.D. (See preface to Jadunātha Sārvabhauma's edition of Ātmānātma-viveka.) This will make Ratna-Kīrti a younger contemporary of Vācaspati Miśra.

In the two parts of Kṣaṇabhañgasiddhi, Ratna-Kīrti attempts to establish by direct and indirect method the theory of the momentariness of the world, that is, as soon as a thing is produced, it perishes and never lasts to the second moment. This is opposed to the theory of the Naiyāikas who consider all knowledge to be momentary, but the word momentary with them includes three moments,—production, duration, and dissolution. In the course of establishing this theory, Ratna-Kīrti refutes Śañkara, Trilocana, Nyāyabhūṣaṇa and Vācaspati. He sums up the arguments of his opponents and of his supporters in the following two verses. (See pages 76 and 77.)—

तदयं पूर्व्वपक्षसंक्षेपः ।

नित्यन्नास्ति न वा प्रतीतिविषयस्तेनाश्रयासिद्धता
हेतोः स्वानुभवस्य च क्षतिरतः क्षिप्तः सपक्षोऽपि च ।

शून्यश्च द्वितयेन सिध्यति न वा सत्तापि सत्ता यथा
नोनित्येन विरोधसिद्धिरसता शक्या क्रमादेरपीति ॥

अत्र सिद्धान्तसंक्षेपः ।

धर्म्मस्य कस्यचिदवस्तुनि मानसिद्धा
बाधाविधिव्यवहृतिः किमिहास्ति नो वा ।
काप्यस्ति चेत् कथमियन्तं न दूषणानि
नास्त्येव चेत् स्ववचनप्रतिषेधसिद्धिरिति ॥

Ratna-Kīrti not only wrote the Apohasiddhi and the two treatises of Kṣaṇabhañgasiddhi, but he mentions two more works by himself, namely—(1) Sthirasiddhidūṣaṇa (page 68), and (2) Citrādvaitasiddhi (page 71).

The fourth treatise in this volume is Avayavi-nirākaraṇa. In the Nyāya-śāstra the theory on the subject is, that the whole, *i.e. avayavī*, has an existence independent of parts, *i.e.* avayava, and the relation between the part and the whole is an eternal relation, which they call Samavāya. Paṇḍita Aśoka takes his stand against this theory and says that the whole is nothing but a collection of parts and has no separate existence whatsoever. And if it has no independent existence the eternal relation is only a myth. He says, "परमाणव एव हि परस्परदेशपरिहारेणोत्पन्नाः परस्परसंहिता अवभासमाना देशवितानवन्तो भासन्ते, विततदेशत्वञ्च स्थूलत्वम्"।

The atoms are produced by avoiding other space and other form, that is, an atom occupies its own space and has its own form. But when a combination of atoms becomes an object of knowledge they appear to occupy an extension of space, and occupying an extension of space means bulk.

Paṇḍita Aśoka quotes Kaṇādaśiṣyas and Dharmottara. He comes, therefore, after the middle of the 9th century.

The fifth work, Sāmānya dūṣaṇa-dik-prasāritā, by the same author, refutes the Naiyāyika theory of Sāmānya or generality as a singular, all-pervading and eternal category of knowledge. He sums up his theory in the following words :—

एतासु पञ्चस्ववभासनीषु
प्रत्यक्षबोधे स्फुटमङ्गुरीषु ।
साधारणं षष्ठमपेक्षते यः
शृङ्गं शिरस्यात्मन ईक्षते सः ।

There are five fingers which are distinctly perceived. The sixth common is not perceived. He who sees a sixth certainly sees a horn on his head.

Further : प्रत्यक्षप्रतिभासिधर्म्मसु न पञ्चस्वङ्गुलीषु स्थितं
सामान्यं प्रतिभासते न च विकल्पाकारबुद्धौ तथा ।
ता एव स्फुटमूर्त्तयोत्र हि विभासन्ते न जातिस्ततः
सादृश्यभ्रमकारणौ पुनरिमावेकोपलब्धिध्वनी ॥

Generality is not perceived in the five fingers, the attributes of which are perceived by the senses, nor is it perceived in the form of a phenomenon. What is percieved are the fingers in their distinct shapes, generality is not perceived. The perception and conception of one are simply the causes of error begotten by resemblance. In this work Paṇḍita Aśoka quotes Uddyotakara.

The sixth is Antarvyāptisamarthana by Ratnākara-Śānti. The argument by which the existence of fire

is proved in the mountain, when put in syllogistic form, runs thus :—

पर्व्वतो वह्निमान् ।
धूमात् ।
यो यो धूमवान् स वह्निमान् यथा महानसं ।
वह्निव्याप्यधूमवानयं ।
तस्माद्वह्निमान् ।

In this case the invariable relation of the smoke to fire, that is, Vyāpti, is established from the example given, namely the kitchen. From thence it is transferred to the mountain, which proves the existence of fire in the mountain.

But in the case of proving momentariness of all things, you do not get an example, and so the invariable relation between the thing which is to be proved, and the thing by which it is to be proved, cannot be established outside. This is a difficulty which the author has to face, and he faces it by declaring that such a relation need not be proved outside in all cases of inference.

There is another difficulty. In the case of fire there is the mountain in which the invariable relation between smoke and fire is proved. But in the case of momentariness there is no such thing as the mountain in which that invariable relation between momentariness and the world is to be proved. This difficulty the author faces by saying that intelligent persons can conceive that invariable relation anywhere.

He practically says that if the invariable relation between the thing to be proved and the thing by which it is to be proved is once conceived, it can be

proved anywhere. No mountain and no kitchen is necessary. This he calls "अन्तर्व्याप्तिसमर्थनं", that is, the establishment of the theory that it is possible to prove the invariable relation *within*, that is, between the thing to be proved and the thing by which it is to be proved.

From Tibetan sources Dr. Satīśa Candra says that Ratnākara-Śānti, the author of this work which has a Tibetan translation, flourished at Vikramśīlā about the end of the tenth century.

The manuscripts from which the works have been edited are described below :—

(1). Apohasiddhi.

*a*. The manuscript belonging to the Government collection in the Asiatic Society of Bengal. The right hand ends of the leaves of this manuscript have greatly corroded, five or six letters being lost in each line by corrosion.

*b*. A manuscript belonging to myself. Both these manuscripts are written in the Bengali hand of the 12th century, and they are both correct. The edition is based on *a*.

(2-3). Kṣaṇabhaṅgasiddhi.

The same two manuscripts as before. The edition is based on *b*.

(4-5). Avayavinirākaraṇa and Sāmānya-dūsaṇa-dik-prasāritā.

One manuscript belonging to me, correctly written in the 12th century Bengali hand.

(6). Antarvyāpti-Samarthana.

From a copy made under my supervision by

Paṇḍita Āśutoṣa Tarkatīrtha of No. III 364B. in the Durbar Library.

In 1902 it was proposed that the first three works for which MSS. (*a*) existed, should be edited by me with the help of certain oriental scholars in Europe,—Dr. Poussin of Ghent, Mr. Thomas of the India Office, and Professor Th. de Scherbatski-Karpovka of St. Petersburg, who would help me from Tibetan and Chinese translations. Photographs were prepared at the cost of the Asiatic Society Bengal and sent to these distinguished scholars. But it was found that no Tibetan or Chinese translation existed; and but for the fortunate accident of a friend of mine presenting precious manuscripts to me, the work could not have been undertaken.

I have to offer my hearty thanks to Dr. Poussin for his invaluable advice and suggestions constantly made in the early part of this edition.

# अपोहसिद्धिः ।

नमः श्रीलोकनाथाय ॥

अपोहः शब्दार्थो निरुच्यते ।

ननु कोऽयं अपोहो नाम ? किमिदं अन्यस्मादपोह्यते ; अस्माद्वा अन्यदपोह्यते ; अस्मिन् वान्यदपोह्यत इति व्युत्पत्त्या विजातिव्यावृत्तं वाह्य [2] मेव विवक्षितं ; बुद्ध्याकारो वा ; यदि वा अपोहनं अपोह इत्यन्यव्यावृत्तिमात्रं इति त्रयः पक्षाः । न तावदादिमौ पक्षौ, अपोहनात्मा विधेरेव विवक्षितत्वात् ; अन्तिमोऽप्यसङ्गतः प्रतौ [3] तिवाधितत्वात् ; तथाहि पर्व्वतोद्देशे वह्निरस्तीति शाब्दौ प्रतीतिर्व्विधिरूपमेवोल्लिखन्त लक्ष्यते ; नानग्निर्नभवतीति निवृत्तिमात्रमामुखयन्तौ । यच्च प्रत्यक्षवाधितं न तत्र सा [4] धनान्तरावकाश इत्यतिप्रसिद्धम् ।

अथ यद्यपि निवृत्तिमहं प्रत्येमीति न विकल्पः । तथापि निवृत्तपदार्थोल्लेख एव निवृत्त्युल्लेखः । न ह्यनन्तर्भावितविशेषणप्रतौ [5] ति व्विशिष्टप्रतीतिः ।

ततो यथा सामान्यमहं प्रत्येमीति विकल्पाभावेऽपि साधारणाकारपरिस्फुरणात् विकल्पबुद्धिः सामान्यबुद्धिः परेषाम् ; तथा निवृत्तप्रत्यया[1] [6] क्षिप्ता निवृत्तिबुद्धिरपोहप्रतीतिव्यवहारमातनोतीति चेत् ? ननु साधारणाकारपरिस्फुरणे विधिरूपतया यदि सामान्यबोधव्यवस्था ; तत् किमायातमस्फु [7] रद्भावाकारे चेतसि निवृत्तिप्रतीतिव्यवस्थायाः । ततो निवृत्तिमहं प्रत्येमीत्येवमाकाराभावेऽपि निवृत्त्याकारस्फुरणं यदि स्यात्, को नाम निवृत्तिप्रतीतिस्थितिमपलपे [IIa] त् । अन्यथाऽसति प्रतिभासे तत्प्रतीतिव्यवहृतिरिति गवाकारेपि चेतसि तुरगबोध इत्यस्तु ।

अथ विशेषणतया अन्तर्भूता निवृत्तिप्रतीतिरित्युक्तं, तथापि यद्यगवापोढ़ इतीदृशा [2] कारोविकल्पस्तदा विशेषणतया तदनुप्रवेशो भवतु, किन्तु गौरिति प्रतीतिः । तदा च सतोपि निवृत्तिलक्षणस्य विशेषणस्य तचानुत्कलनात् ; कथं तत् प्रतीतिव्यवस्था । अथैवं [3] मतिः । यद्विधिरूपं स्फुरितं तस्य परापोहोऽप्यस्तीति तत्प्रतीतिरुच्यते । तथापि सम्बन्धमात्रमपोहस्य विधिरेव साक्षान्निर्भासी । अपि चैवमध्यक्षस्या [4] प्यपोह-

१ B निमित्तप्रत्यया० ।

विषयत्वमनिवार्यम्। विशेषतो विकल्पादेकव्यावृत्तौ-
ल्लेखिनोऽखिलान्यव्यावृत्तमीक्षमाणस्य। तस्माद्विधा-
कारावग्रहाद्ध्यक्षवद्विकल्पस्या [5] पि विधिविषयत्वमेव
नान्यापोहविषयत्वमिति कथमपोहः शब्दार्थो घुष्यते॥

अत्राभिधीयते॥

नास्माभिरपोहशब्देन विधिरेव केवलोऽभिप्रेतः।
[6] नाप्यन्यव्यावृत्तिमात्रं, किन्त्वन्यापोहविशिष्टो विधिः
शब्दानामर्थः। ततश्च न प्रत्येकपक्षोपनिपातिदोषाव-
काशः। यत्तु गोः प्रतीतौ न तदात्मापरात्मेति
सामर्थ्यादपो [7] हः पश्चान्निश्चीयत इति विधिवादिनां
मतम्; अन्यापोहप्रतीतौ वा सामर्थ्यात् अन्यापोढ़ो-
वधार्यते इति प्रतिषेधवादिनां मतम्। तदसुन्दरम्।
प्राथमिकस्यापि प्रतिपत्तिक्र [IIb] मादर्शनात्। न
हि विधिं प्रतिपद्य कश्चिदर्थापत्तितः पश्चादपोहमव-
गच्छति; अपोहं वा प्रतिपद्यान्यापोढ़म्; तस्माद्
गोः प्रतिपत्तिरिति अन्यापोढ़प्रतिपत्तिरुच्यते। यद्यपि
चान्यापोढ़शब्दानुल्ले [2] ख उक्तः। तथापि नाप्रति-
पत्तिरेव विशेषणभूतस्यान्यापोहस्य; अगवापोढ़ एव
गोशब्दस्य निवेशितत्वात्। यथा नीलोत्पले निवे-
शितादिन्दीवरशब्दान्नीलोत्पल प्रतीतौ तत्का [3] ल

एव नीलिमस्फुरणमनिवार्य्यम् ; तथा गोशब्दाद्प्य-गवापोढ़े निवेशितात् गो-प्रतीतौ तुल्यकालमेव विशे-षणत्वात् अगो[ऽ]पोहस्फुरणमनिवार्य्यम् । यथा प्रत्य-क्षस्य प्रसह्य रूपा [4] भावग्रहणमभावविकल्पोत्पादन-शक्तिरेव । तथा विधिविकल्पानामपि तदनुरूपानु-ष्ठानदानशक्तिरेवाभावग्रहणमभिधीयते । पर्य्युदास-रूपाभावग्रहणन्तु नियत [5] स्वरूपसम्वेदनमुभयोर-विशिष्टं ; अन्यथा यदि शब्दार्थप्रतिपत्तिकाले कलितो न परापोहः ; कथमन्यपरिहारेण प्रवृत्तिः । ततो गां वधानेति चोदितोऽश्वादीनपि [6] वध्नीयात् ।

यदप्यवोचद्वाचस्पतिः ; जातिमत्यो व्यक्तयः ; विक-ल्पानां शब्दानाञ्च गोचरः ; तासाञ्च तद्वतीनां रूप-मतज्जातीयपरावृत्तमित्यर्थतस्तदवगतेर्न गामभ्धानेति चो [7] दितोऽश्वादीन् बध्नाति । तदप्यनेनैव निरस्तं । यतो जातेरधिकायाः प्रक्षेपेऽपि व्यक्तीनां रूपमतज्जा-तीयव्यावृत्तमेव चेत्, तदा तेनैव रूपेण शब्दविकल्प-[III a] योर्विषयीभवन्तीनां कथमतद्व्यावृत्तिपरिहारः ?

अथ न विजातीयव्यावृत्तं व्यक्तिरूपं, तथाप्रतीतं, वा तदा जातिप्रसाद एष इति कथमर्थतोपि तदवगति-रित्युक्तप्रायम् ।

अथ जातिबलादेवान्यतो [2] व्यावृत्तम्। भवतु जातिबलात् स्वहेतुपरम्परावलाद्वान्यव्यावृत्तम्। उभयथापि व्यावृत्तप्रतिपत्तौ व्यावृत्तिप्रतिपत्तिरस्त्येव। नचागो[ऽ]पोढ़े गोशब्दसङ्केतविधावन्योन्याश्रयदोषः। [3] सामान्ये तद्वति वा सङ्केतेऽपि नदोषावकाशात्। न हि सामान्यं नाम सामान्यमात्रमभिप्रेतम् तुरगेपि गोशब्दसङ्केतप्रसङ्गात्। किन्तु गोत्वम्। तावता च स एव दोषः। [4] गवापरिज्ञाने गोत्वसामान्यापरिज्ञानात्। गोत्वसामान्यापरिज्ञाने गोशब्दवाच्यापरिज्ञानात्। तस्मात् एकपिण्डदर्शनपूर्व्वको यः सर्व्वव्यक्तिसाधारण इव बहिरध्य [5] स्तो विकल्पबुद्ध्याकारः, तचायं गौरिति सङ्केतकरणे नेतरेतराश्रयदोषः। अभिमते च गोशब्दप्रवृत्तावगोशब्देन शेषस्याप्यभिधानमुचितम्। न चान्यापोढ़ा [6] न्यापोहयोर्व्विरोधो-विशेष्यविशेषण[1]भूतिर्व्वा; परस्परव्यवच्छेदाभावात्, सामानाधिकरण्यसद्भावात्, भूतलघटाभाववत्। स्वाभावेन हि विरोधो न परभावेनेत्याबालप्रसिद्धं। [7] एष पन्थाः शुघ्रमुपतिष्ठत इत्यचाप्यपोहो गम्यत एव; अप्रकृत[2]पथान्तरापेक्षया एष एव। शुघ्रप्रत्यनीकानिष्ट-

१ B ०भाव०। २ B प्रकृत०।

स्थानापेक्षया अग्रमेव । अरण्यमार्गवद्दिच्छेदाभावादुपतिष्ठत [III6] एव । सार्थदूतादिव्यवच्छेदेन पन्था एवेति प्रतिपदं व्यवच्छेदस्य सुलभत्वात् । तस्मादपोहधर्म्मणो विधिरूपस्य शब्दादवगतिः ; पुण्डरीकशब्दादिव श्वेतिमविशिष्टस्य पद्मस्य । यद्येवं विधि [2] रेव शब्दार्थोवक्तुमुचितः । कथमपोहो गीयत इति चेत् ? उक्तमचापोहशब्देनान्यापोहविशिष्टो विधिरुच्यते ; तच्च विधौ प्रतीयमाने विशेषणतया तुल्यकालमन्यापोहप्रतीतिरि [3] ति । न चैवं प्रत्यक्षस्याप्यपोहविषयत्वव्यवस्था कर्त्तुमुचिता ; तस्य शाब्दप्रत्ययस्येव वस्तुविषयत्वे विवादाभावात् । विधिशब्देन च यथाध्यवसायमतद्रूपपरावृत्तो [4] वाह्योर्थोभिमतः ; यथाप्रतिभासं बुद्ध्याकारश्च तच्च वाह्योर्थोध्यवसायादेव शब्दवाच्यो व्यवस्थाप्यते । न स्वलक्षणपरिस्फूर्त्त्या प्रत्यक्षवद्देशकालावस्थानियतप्रव्यक्त [5] स्वलक्षणास्फुरणात् । यच्छास्त्रं ॥

- शब्देनाव्यापृताख्यस्य बुद्धावप्रतिभासनात् ।
अर्थस्य दृष्टाविवेति,

इन्द्रियशब्दस्वभावोपायभेदात् एकस्यैव[1] प्रतिभास भेद इति [6] चेत् ? अत्राप्युक्तम् ।

---

१ B adds अर्थस्य ।

जातो नामाश्रयोन्यान्यः चेतसान्तस्य वस्तुनः ।
एकस्यैव कुतो रूपं भिन्नाकारावभासि तत् ॥

न हि स्पष्टास्पष्टे द्वे रूपे परस्परविरुद्धे [7] एकस्य वस्तुनः स्तः ; यत एकेनेन्द्रियबुद्धौ प्रतिभासेतान्येन विकल्पे, तथा सति वस्तुन एव भेदप्राप्तेः ; न हि स्वरूपभेदादपरो वस्तुभेदः । न च प्रतिभासभेदादपर स्वरू- [IV$a$] पभेदः ; अन्यथा चैलोक्यमेकमेव वस्तु स्यात् । दूरासन्नदेशवर्त्तिनोः पुरुषयोः एकच शाखिनि स्पष्टास्पष्टप्रतिभासभेदेपि न शाखिभेद इति चेत् ! न ब्रूमः प्रतिभासभेदोभिन्नवस्तु [2] नियतः । किन्तु, एकविषयत्वाभावनियत इति । ततो यचार्थक्रियाभेदादिसचिवः प्रतिभासभेदः तच वस्तुभेदः, घटवत् । अन्यच पुनर्न्नियमेनैकविषयतां परिहरतीत्येकप्रतिभा [3] सो भ्रान्तः ।

एतेन यदाह वाचस्पतिः ; न च शब्दप्रत्यक्षयोर्व्वस्तुगोचरत्वे प्रत्ययाभेदः कारणभेदेन पारोक्ष्यापारोक्ष्यभेदोपपत्तेरिति । तन्नोपयोगि । [4] परोक्षप्रत्ययस्य वस्तुगोचरत्वासमर्थनात् । परोक्षताश्रयस्तु कारणभेद इन्द्रियगोचरग्रहणविरहेणैव कृतार्थः । तन्न शाब्दे प्रत्यये स्वलक्षणम् परिस्फुरति [5] किञ्च स्वलक्षणात्मनि वस्तुनि वाच्ये सर्व्वात्मना प्रतिपत्तेः, विधिनिषेधयोर-

योगः। तस्य हि सद्भावेस्तीति व्यर्थं, नास्तीत्यसमर्थम्; असद्भावे[१] नास्तीति व्यर्थमस्ती [6] त्यसमर्थम्। अस्ति चास्त्यादिपदप्रयोगः। तस्मात् शब्दप्रतिभासस्य वाह्यार्थ-भावाभावसाधारणं न तद्विषयतां क्षमते।

यच्च वाचस्पतिना जातिमद्व्यक्तिवाच्यतां स्ववाचैव प्रस्तु [7] त्याननन्तरमेव न च शब्दार्थस्य जातेर्भावा-भावसाधारणं नोपपद्यते; सा हि स्वरूपतो नित्यापि देशकालविप्रकीर्णा[२]नेकव्यक्त्याश्रयतया भावाभावसाधा-रणीभवन्नस्तिना [IV6] स्तिसम्बन्धयोग्या; वर्त्तमान-व्यक्तिसम्बन्धिता हि जातेरस्तिता; अतीतानागत-व्यक्तिसम्बन्धिता च नास्तितेति सन्दिग्धव्यतिरेकि-त्वादनैकान्तिकमभावाभावसाधारणमन्यथासिद्धं वेति विलपितं। [2] [३]तावन्न प्रकृतक्षतिः। जातौ भरं न्यस्यता स्वलक्षणावाच्यत्वस्य स्वयं स्वीकारात्। किञ्च सर्व्वच पदार्थस्य स्वलक्षण[४]स्वरूपेणैवास्तित्वादिकं चिन्त्यते। जातेस्तु वर्त्तमानादिव्यक्तिस [3] म्बन्धोस्तित्वादिकमिति तु बालप्रतारणम्। एवं जातिमद्व्यक्तिवचनेऽपि दोषः; व्यक्तेश्चेत् प्रतीतिसिद्धिः, जातिरधिका प्रतीयताम्, मा

---

१ B adds तु after असद्भावे।
२ A विप्रकीर्ण०।
३ B तावता तावत्।
४ B रूपेणेव।

वा, न तु व्यक्तिप्रतीतिदोषान्मुक्तिः। एते [4] न यदुच्यते कौमारिलैः। सभागत्वादेव वस्तुनो न साधारण्यदोषः। दृष्टत्वं ह्यनिर्द्धारितभावाभावं शब्दादवगम्यते। तयोरन्यतरेण शब्दान्तरावगतेन स [5] म्बध्यत इति। तदप्यसङ्गतम्; सामान्यस्य नित्यस्य प्रतिपत्तावनिर्द्धारितभावाभावत्वायोगात्। यच्चेदं न च प्रत्यक्षस्येव शब्दानां अर्थप्रत्यायनप्रकारो येन तद्दृष्ट इवा [6] स्त्यादिशब्दापेक्षा न स्यात्; विचित्रशक्तित्वात् प्रमाणानामिति। तदप्यैन्द्रियकशाब्दप्रतिभासयोरेकस्वरूपग्राहित्वे भिन्नावभासदूषणेन दूषितम् [7] विचित्रशक्तित्वञ्च प्रमाणानां साक्षात्काराध्यवसायाभ्यामपि चरितार्थम्। ततो यदि प्रत्यक्षार्थप्रतिपादनं शाब्देन तद्वदेवावभासः स्यात्; अभवंश्च न तद्विषयख्यापनं क्षम [Va] ते। ननु दृष्टशब्देन दृष्टत्वांशे चोदिते सत्त्वाद्यंशनिश्चयनार्थमस्त्यादिपदप्रयोग इति चेत्? निरंशत्वेन प्रत्यक्षसमधिगतस्य स्वलक्षणस्य कोऽवकाशः पदान्तरेण; धर्म्मान्तरविधिनिषेधयोः प्रमाण-[2] न्तरेण वा। प्रत्यक्षेऽपि प्रमाणान्तरापेक्षा दृष्टेति चेत्? भवतु तस्यानिश्चयात्मत्वात् अनभ्यस्तस्वरूपविषये; विकल्पस्तु स्वयन्निश्चयात्मको यच्च ग्राही तच्च किमपरेण?

अस्ति च शब्दलिङ्गान्तरापेक्षा [3] ततो न वस्तु स्वरूपग्रहः। ननु भिन्ना जात्यादयो धर्म्माः परस्परं धर्म्मिणश्चेति जातिलक्षणैकधर्म्मद्वारेण प्रतीतेपि शाखिनि धर्म्मान्तरवत्तया न प्रतीतिरिति किन्न भिन्नाभिधानाधी [4] नो धर्म्मान्तरस्य नीलचलोच्चैस्तरत्वादेरवबोधः। तदेतदसङ्गतम् ; अखण्डात्मनः स्वलक्षणस्य प्रत्यक्षे प्रतिभासात्। दृश्यस्य धर्म्मधर्म्मिभेदस्य प्रत्यक्षप्रतिक्षिप्तत्वा [5] दन्यथा सर्व्वं सर्व्वत्र स्यादित्यतिप्रसङ्गः। काल्पनिकभेदाश्रयस्तु धर्म्मधर्म्मिव्यवहार इति प्रसाधितम् शास्त्रे ; भवतु वा पारमार्थिको धर्म्मधर्म्मिभेदः। तथाप्यनयोः समवा [6] याद्दे र्दूषितत्वादुपकारलक्षणैव प्रत्यासत्तिरेषितव्या। एवञ्च यथेन्द्रियप्रत्यासत्त्या प्रत्यक्षेण धर्म्मिप्रतिपत्तौ सकलतद्धर्म्मप्रतिपत्तिः। तथा शब्दलिङ्गाभ्यामपि वाच्यवाचकादि [7] सम्बन्धप्रतिबद्धाभ्यां धर्म्मिप्रतिपत्तौ निरवशेषतद्धर्म्मप्रतिपत्ति र्भवेत् ; प्रत्यासत्तिमात्रस्याविशेषात्।

यच्च वाचस्पतिः ; नचैकोपाधिना सत्त्वे[1] विशिष्टे तस्मिन् गृहीते ; उपाध्यन्त [7] रविशिष्टतद्ग्रहः। स्वभावो हि द्रव्यस्य उपाधिभिर्व्वि[2]शिष्यते। नतूपाधयो

१ B सत्त्वेन।  २ A विशेष्यते।

वा विशेषत्वं वा तस्य स्वभाव इति। तदपि ज्ञवत एव। नह्यभेदादुपाध्यन्तरग्रहणाच्चमासज्ज्ञि [Vb] तम्। भेदं पुरस्कृत्यैवोपकारकग्रहणे उपकार्य्यग्रहणप्रसञ्जनात्। न चाग्निधूमयोः कार्य्यकारणभाव इव स्वभावत एव धर्म्मधर्म्मिणोः प्रतिनियमकल्पनमुचितम्। तयोरपि प्रमाणासिद्ध [2] त्वात्। प्रमाणसिद्धे च स्वभावोपवर्णनमिति न्यायः॥

यच्चाच न्यायभूषणेन सूर्य्यादिग्रहणे तदुपकार्य्यशेष वस्तुराशिग्रहणप्रसञ्जनमुक्तम्; तदभिप्रायानवगाहन फलम् तथा [3] हि त्वन्मते धर्म्मधर्म्मिणोर्भेदः उपकारलक्षणैव च प्रत्यासत्तिः। तदोपकारकग्रहणे समानदेशस्यैव धर्म्मरूपस्यैव चोपकार्य्यस्य ग्रहणमासज्ज्ञितम्। तत् कथं सूर्य्यो [4] पकार्य्यस्य भिन्नदेशस्य द्रव्यान्तरस्य वा दृष्टव्यभिचारस्य ग्रहणप्रसङ्गः सङ्गतः। तस्मात् एकधर्म्मद्वारेणापि वस्तुस्वरूपप्रतिपत्तौ सर्व्वात्मप्रतीतेः; क्व शब्दान्तरेण [5] विधिनिषेधावकाशः। अस्ति च, तस्मान्न स्वलक्षणस्य शब्दविकल्पलिङ्गप्रतिभासित्वमिति स्थितम्॥

नापि सामान्यम् शाब्दप्रत्ययप्रतिभासि। सरितः पारे गावश्चरन्तीति [6] गवादिशब्दात् साक्षात्सङ्ग-

लाङ्गूलादयोऽक्षराकारपरिकरिताः सजातीयभेदापरामर्शनात् सम्पिण्डितप्रायाः प्रतिभासन्ते। न च तदेव सामान्यम्।

वर्णाक्ष [7] त्यक्षराकारशून्यङ्गोत्वं हि कथ्यते।

तदेव च सास्नाशृङ्गादिमात्रमखिलव्यक्तावत्यन्तविलक्षणमपि स्वलक्षणेनैकीक्रियमाणम् सामान्यमित्युच्यते। तादृशस्य वाह्यस्याप्राप्ते [VIa] र्भ्रान्तिरेवासौ केशप्रतिभासवत्। तस्माद्वासनावशाद्बुद्धेरेव तदात्मना विवर्त्तोयमस्तु, असदेव वा[1] तद्रूपं ख्यातु; व्यक्तय एव वा[2] सजातीयभेदतिरस्कारेणान्यथा भासन्ता [2] मनुभवव्यवधानात्; स्मृतिप्रमोषो वाभिधीयताम्; सर्व्वथा निर्व्विषयः खल्वयं सामान्यप्रत्ययः; क्व सामान्यवार्त्ता? यत् पुनः सामान्याभावे सामान्यप्रत्ययस्याकस्मिक[3]त्वमुक्तं तदयुक्तम्। यतः पूर्व्वपिण्डदृष्ट[3]दर्शनस्मरणसहकारिणातिरिच्यमानाविशेषप्रत्ययजनिका सामग्री निर्व्विषयं सामान्यविकल्पमुत्पादयति। त[4]देवन्न शाब्दप्रत्यये जातिः प्रतिभाति; नापि प्रत्यक्षे न चानुमानतोऽपि सिद्धिः; अदृश्यत्वे प्रतिबद्धलिङ्गादर्शनात्। नापीन्द्रियवदस्याः सिद्धिः। ज्ञानकार्य्यतः [5] कादाचित्कस्यैव

---

१ A असदेवातद्रूपं। २ A omits वा। ३ B omits दृष्ट।

निमित्तान्तरस्य सिद्धेः। यदापि पिण्डान्तरे अन्तराले वा गोबुद्धेरभावं दर्शयेत्; तदा शावलेयादिसकल गोपिण्डानामेवाभावाद्भावो गो [6] बुद्धेरुपपद्यमानः कथमर्थान्तरमाक्षिपेत्? गोत्वादेव गोपिण्डः, अन्यथा तुरगोपि गोपिण्डः स्यात्। यद्येवं गोपिण्डादेव गोत्वमन्यथा तुरगत्वमपि गोत्वम् [7] स्यात्। तस्मात् कारणपरम्परात एव गोपिण्डो गोत्वं तु भवतु मा वा। ननु सामान्यप्रत्ययजननसामर्थ्यं यद्येकस्मात् पिण्डाद्भिन्नम्; तदा विजातीयव्यावृत्तं पिण्डान्तरमसमर्थं। [VIb] अथ भिन्नं तदा तदेव सामान्यम् नाम्नि परं विवाद इति चेत्? अभिन्नैव सा शक्तिः प्रति वस्तु; यथात्वेकः शक्तस्वभावो भावः तथा अन्योपि भवन् कीदृशन्दोषमावहति? यथा भवतां [2] जातिरेकापि समानध्वनिप्रसवहेतुरन्यापि स्वरूपेणैव जात्यन्तरनिरपेक्षा। तथास्माकं व्यक्तिरपि जातिनिरपेक्षा स्वरूपेणैव भिन्ना हेतुः।

यत्तु चिलोचनः। अश्वत्वगोत्वा [3] दीनां सामान्य विशेषाणां स्वाश्रये[1] समवायः सामान्यम्; सामान्यमित्यभिधानप्रत्यययोर्निमित्तमिति। यद्येवं व्यक्तिषष्ठ्यय-

१ B स्वाश्रयेषु।

मेव तथाभिधानप्रत्ययहेतुरस्तु । किं सामान्यस्वीकार [4] प्रमादेन ।

न च समवायः सम्भवी ॥

इहेति बुद्धेः समवायसिद्धि-
रिहेति धीश्च द्वयदर्शने स्यात् ।
न च क्वचित्तद्विषये त्वपेक्षा
स्वकल्पनामात्रमतोभ्युपायः ॥

एतेन येयं [5] प्रत्ययानुवृत्तिरनुवृत्तवस्त्वनुयायिनी कथमत्यन्तभेदिनीषु व्यक्तिषु व्यावृत्तविषयप्रत्ययभावानुपातिनीषु भवितुमर्हतीत्यूहाप्रवर्त्तनमस्य प्रत्याख्यातम् । जातिष्वेव पर [6] स्परव्यावृत्ततया व्यक्तीयमानास्वनुवृत्तप्रत्ययेन व्यभिचारात् । यत् पुनरनेन विपर्य्यये बाधकमुक्तम्, अभिधानप्रत्ययानुवृत्तिः कुतश्चिन्निवृत्त्य क्वचिदेव भवन्ती निमित्तवती [7] । न चान्यन्निमित्तमित्यादि ॥ तन्न सम्यक् । अनुवृत्तमन्तरेणापि अभिधानप्रत्ययानुवृत्तेरतद्रूपपरावृत्तस्वरूपविशेषात् अवश्यं स्वीकारस्य साधितत्वात् । तस्मात्,

तुल्य भेदे यया जा [VII*a*] तिः प्रत्यासत्त्या प्रसर्पति ।
क्वचिन्नान्यच सैवास्तु शब्दज्ञाननिबन्धनम् ।

यत् पुनरत्र न्यायभूषणेनोक्तं नन्वेवं भवति । यया

प्रत्यासत्त्या दण्डसूचादिकं प्रसर्पति क्वचिन्नान्यत्र सैव प्र[2]त्यासत्तिः पुरुषस्फटिकादिषु दण्डिसूचित्वादिव्यवहारनिबन्धनमस्तु किं दण्डसूचादिनेति[1]। तदसङ्गतम्। दण्डसूचयोर्हि पुरुषस्फटिकप्रत्यासन्नयोः दृष्टयोः दण्डिसूचिप्रत्ययहेतुत्वं [3] नापलप्यते। सामान्यन्तु स्वप्नेऽपि न दृष्टम्। तद्यदीदं परिकल्पनीयम् तदा वरम् प्रत्यासत्तिरेव सामान्यप्रत्ययहेतुः परिकल्प्यताम्, किं गुर्व्या परिकल्पनयेत्यभिप्राया [4] परिज्ञानात्।

अथेदं जातिप्रसाधकमनुमानमभिधीयते।

यद्विशिष्टज्ञानं तद्विशेषणग्रहणनान्तरीयकम्। यथा दण्डिज्ञानम्। विशिष्टज्ञानञ्चेदं गौरयमित्यर्थतः कार्य्य-[5]हेतुः। विशेषणानुभवकार्य्यं हि दृष्टान्ते विशिष्टबुद्धिः सिद्धेति। अत्रानुयोगः, विशिष्टबुद्धेर्भिन्नविशेषणग्रहणनान्तरीयकत्वं वा साध्यम्; विशेषण [6] मात्रानुभवनान्तरीयकत्वं वा। प्रथमपक्षे पक्षस्य प्रत्यक्षबाधासाधनावधानमनवकाशयति। वस्तुग्राहिणः प्रत्यक्षस्योभयप्रतिभासाभावात्। विशिष्टबुद्धित्वञ्च सामान्यम्। हेतुर [7] नैकान्तिकः। भिन्नविशेषणग्रहणमन्तरेणापि दर्शनात्। यथा स्वरूपवान् घटः। गोत्वं सामान्य-

१ B here reads दण्डसूचत्वादिना।

मिति वा । द्वितीयपक्षे तु सिद्धसाधनम् । स्वरूपवान् घट इत्यादिवत् गोत्वजातिमा [VIIb] न् पिण्ड इति परिकल्पितम् भेदमुपादाय विशेषणविशेष्यभावस्येष्टत्वा-दगोव्यावृत्तानुभवभावित्वाद् गौरयमिति व्यवहारस्य । तदेव न सामान्यबुद्धिः[१] । बाधकं च सामान्यगुणकर्म्मा-द्युपा [2] धिचक्रस्य, केवलव्यक्तिग्राहकं पटुप्रत्यक्षम् । दृश्यानुपलम्भो वा[२] प्रसिद्धः ।

तदेवं विधिरेव शब्दार्थः । स च वाह्योर्थो बुद्ध्याकारश्च विवक्षितः, तच्च न बुद्ध्याकारस्य तत्त्वतः सम्वृत्या वा विधिनि[3]षेधौ । स्वसम्वेदनप्रत्यक्षगम्यत्वात् । अन-ध्यवसायाच्च । नापि तत्त्वतो वाह्यस्यापि विधिनिषेधौ तस्य शब्दे प्रत्ययेऽप्रतिभासनात् । अतएव सर्व्वधर्म्मा-णान्तत्त्वतोऽनभिलाप्यत्वं [4] प्रतिभासाध्यवसाया-भावात् तस्मात् वाह्यस्यैव सांवृतौ विधिनिषेधौ । अन्यथा सम्व्यवहारहानिप्रसङ्गात् । तदेवं ।

नाकारस्य न वाह्यस्य तत्त्वतोविधिसाधनम्[३] ।
वहिरेव [5] हि संवृत्या संवृत्यापि तु नाकृतेः ॥

एतेन यद्धर्म्मोत्तरः ॥ आरोपितस्य वाह्यत्वस्य[४]

---

१ B तदेवं न सामान्यसिद्धिः । २ not in A.
३ B reads ०बाधनम् । ४ B omits स्य ।

विधिनिषेधावित्यलौकिकमनागममतार्किकीयं कथयति। तदपहस्तितम् ।

नन्वध्यवसाये [6] यद्यध्यवसेयं वस्तु न स्फुरति तदा तदध्यवसितमिति कोऽर्थः ? अप्रतिभासेऽपि प्रवृत्तिविषयीकृतमिति योऽर्थः । अप्रतिभासाविशेषे विषयान्तरपरिहारेण कथन्नियतविषया प्रवृत्तिरिति चेत् ? [7] उच्यते ; यद्यपि विश्वमगृहीतं तथापि विकल्पस्य नियतसामग्रीप्रसूतत्वेन नियताकारतया नियतशक्तित्वात् नियता एव जलादौ प्रवृत्तिः । धूमस्य परोक्षाग्निज्ञाननिजननवत् ।[1]

नियतविषया हि भावाः [VIIIa] प्रमाणपरिनिष्ठितस्वभावा न शक्तिसाङ्कर्य्यपर्य्यनुयोगभाजः । तस्मात् [2]तदध्यवसायित्वमाकारविशेषयोगात् तत्प्रवृत्तिजनकत्वम् । न च सादृश्यादारोपेण प्रवृत्तिं ब्रूमः । येनाकारे वाह्यस्य वाह्ये वा आ [2] कारस्यारोपद्वारेण दूषणावकाशः । किन्तर्हि स्ववासनाविपाकवशादुपजायमानैव बुद्धिरपश्यन्त्यपि वाह्यं वाह्ये वृत्तिमातनोतीति विप्लुतैव । तदेवमन्याभावविशिष्टो विजातिव्या-

१ A omits धूमस्य to वत् and adds यथदापत्तिवत् । यद्यपि वह्नौ धूमस्य नैकोत्तरभावस्तथापि ततो धूमस्यैवोत्पादो मान्यश्च ।

२ B omits तत् ।

वृत्तोर्थो [3] विधिः। स एव चापोहशब्दवाच्यः शब्दानामर्थः प्रवृत्तिनिवृत्तिविषयश्चेति स्थितम्॥

अत्र प्रयोगः। यद्वाचकं तत्सर्व्वमध्यवसितातद्रूपपरावृत्तवस्तुमात्रगोचरम्। यथेह कूपे [4] जलमिति वचनम्। वाचकश्चेदं गवादिशब्दरूपमिति स्वभावहेतुः। नायमसिद्धः, पूर्व्वोक्तेन न्यायेन पारमार्थिकवाच्यवाचकभाव[1]स्याभावेऽपि; अध्यवसायकृतस्य सर्व्व[2]व्यव[5]हारिभिरवश्यस्वीकर्त्तव्यत्वात्। अन्यथा सर्व्वव्यवहारोच्छेदप्रसङ्गात्। नापि विरुद्धः सपक्षे भावात्। न चानैकान्तिकः; तथाहि शब्दानामध्यवसितविजातिव्यावृत्तव [6] स्तुमात्रविषयत्वमनिच्छद्भिः परैः परमार्थतो

वाच्यं स्वलक्षणमुपाधिरुपाधियोगः
सोपाधिरस्तु यदि वा कृतिरस्तु बुद्धेः,

गत्यन्तराभावात्। अविषयत्वे च वाचकत्वायो [7] गात्। तच्च।

आद्यन्तयोर्न्न समयः फलशक्तिहाने-
र्मध्येप्युपाधिविरहात्तितयेन युक्तः॥

तदेवं वाच्यान्तरस्याभावात्। विषयवत्त्वलक्षणस्य

---

१ A omits •भाव•। २ B सर्व्वस्य।

व्यापकस्य निवृत्तौ विपक्षतो निव [VIII*b*] र्त्तमानम् वाचकत्वमध्यवसितवाह्यविषयत्वेन व्याप्यत इति व्याप्ति-सिद्धिः ।

शब्दैस्तावन्मुख्यमाख्यायतेऽर्थ
स्तचापोहस्तद्गुणत्वेन गम्यः ।
अर्थश्चैको ऽध्यासतो भासतोऽन्यः
स्थाप्यो वाच्यस्तत्त्वतो नैव कश्चित् ॥[1]

अपोहसिद्धिः समाप्ता ॥

कृतिरियम्महापण्डितरत्नकीर्त्तिपादानाम् ॥

भवत्वपोहे कृतिनाम्प्रपञ्चो
[व] [2] स्तुस्वरूपास्फुरणन्तु मर्म्म ।
तचादृढ़े सर्व्वमयत्नशीर्णं
दृढ़े तु सौस्थ्यन्ननु तावतैव ॥
सम्पूर्णरात्रिप्रहरद्वयेन
कीर्त्तेरपोहो लिखितः सुखेन ।
चैलोक्यदत्तेन परात्महेतोः
[य] [3] त्नादतोऽयं परिरक्षणीयः ॥[2]

---

[1] This verse does not appear in B.

[2] Post-Colophon verses not in B.

# क्षणभङ्गसिद्धिः ।

नमः समन्तभद्राय ।[1]

आक्षिप्तव्यतिरेका या व्याप्तिरन्वयरूपिणी ।
साधर्म्यवति दृष्टान्ते सत्त्वहेतोरिहोच्यते ॥

यत् सत् तत् क्षणिकं यथा घटः सन्तश्चामी विवादास्पदीभूताः पदार्था इति ।

हेतोः परोक्षार्थप्रतिपादकत्वं हेत्वाभासत्वशङ्कानिराकरणमन्तरेण न शक्यते प्रतिपादयितुं । हेत्वाभासाश्च असिद्धविरुद्धानैकान्तिकभेदेन[2] त्रिविधाः । तत्र न तावदयमसिद्धो हेतुः । यदि नाम दर्शने दर्शने नानाप्रकारं सत्त्वलक्षणमुक्तमास्ते, अर्थक्रियाकारित्वं, सत्तासमवायः, स्वरूपसत्त्वं, उत्पादव्ययध्रौव्ययोगित्वं प्रमाणविषयत्वं, सदुपलम्भप्रमाणगोचरत्वं व्यपदेशविषयत्वमित्यादि, तथापि किमनेन अप्रस्तुतेन इदानीमेव निष्टङ्कितेन । यदेव हि प्रमाणतो निरूप्यमाणं पदार्थानां सत्त्वमुपपन्नं भविष्यति; तदेव वयमपि स्वीकरि-

---

१ A नमः श्रीवीतरागाय । २ A प्रभेदेन । ३ A °लक्षक° ।

ष्यामः। केवलं यदेतदर्थक्रियाकारित्वं सर्व्वजनप्रसिद्धमास्ते; तत् खल्वत्र सत्त्वशब्देनाभिसन्धाय साधनत्वेनोपात्तं। तच्च यथायोगं प्रत्यक्षानुमानप्रमाणप्रसिद्धसङ्गावेषु भावेषु पक्षीकृतेषु प्रत्यक्षादिना प्रमाणेन प्रतीतमिति न [१]स्वरूपेणाश्रयद्वारेण वाऽसिद्धसम्भावनापि।

नापि [२]विरुद्धः। सपक्षीकृते घटे सद्भावात्। ननु कथमस्य सपक्षत्वं, पक्षवदत्रापि क्षणभ[२]ङ्गासिद्धेः। नच्चास्य प्रत्यक्षतः क्षणभङ्गसिद्धिः। तथात्वेनानिश्चयात्। नापि सत्त्वानुमानतः। पुन[३]र्निदर्शनान्तरापेक्षायामनवस्थाप्रसङ्गात्। न चान्यदनुमानमस्ति।

सम्भवे वा तेनैव पक्षेऽपि क्षणभङ्गसिद्धेरलं सत्तानुमानेनेति चेत्। उच्यते। अनुमानान्तरमेव प्रसङ्गप्रसङ्गविपर्य्ययात्मकं घटे[४] क्षणभङ्गप्रसाधकं प्रमाणा[५]न्तरमस्ति, तथा[६] घटो वर्त्तमानक्षणे तावत् एकामर्थक्रियां करोति। [७]अतीतानागतक्षणयोरपि किं तामेवार्थक्रियां कुर्यादन्यां वा, नवा [८]कामपि क्रियामिति

---

१ A स्वरूपद्वारेण।
२ A विरुद्धता।
३ A निदर्शनापेक्षायां।
४ A घटस्य।
५ A प्रमाणमस्ति।
६ A तथाहि।
७ A अतीतानागतयोः।
८ A कामपीति।

त्रयः पक्षाः । नाद्य प्रथमपक्षो युक्तः कृतस्य करणायोगात् । अथ द्वितीयोऽभ्युपगम्यते [1]तदिदमत्र विचार्य्यताम् । यदा घटो वर्त्तमानक्षणभावि कार्य्यं करोति तदा किमतीतानागतक्षणभाविन्यपि कार्य्ये शक्तोऽशक्तो वा । यदि शक्तस्तदा वर्त्तमानक्षणभाविकार्य्यवत् अतीतानागतक्षणभाव्यपि कार्य्यं[2] कुर्य्यात् तत्रापि शक्तत्वात् शक्तस्य क्षेपायोगात् । अन्यथा वर्त्तमानक्षणभाविनोऽपि कार्य्यस्याकरणप्रसङ्गात् पूर्व्वापरकालयोरपि शक्तत्वेनाविशेषात्, समर्थस्य च सहकार्य्यपेक्षाया अयोगात् । अथाशक्तस्तदा एकत्र कार्य्ये शक्ताशक्तत्वविरुद्धधर्म्माध्यासात् क्षणवि[3]ध्वंसो घटस्य दुर्व्वारप्रसरः स्यात् ।

नापि तृतीयः पक्षः सङ्गच्छते शक्तस्वभावानुवृत्तेरेव । यदा हि शक्तस्य [4]स्वभावस्य विलम्बोऽप्यसह्यस्तदा दूरोत्सारितमकरणम् । अन्यथा वार्त्तमानिकस्यापि कार्य्यस्याकरणं स्यात् इत्युक्तं । तस्माद् यद् यदा यज्जननव्यवहारपात्रं, तत्तदा तत् कुर्य्यात् । अकुर्व्वच्च न

---

१ A तदेतदत्र ।
२ B adds तदापि ।
३ A °ध्वंसः ।
४ A पदार्थस्य ।

जननव्यवहारभाजनम् । तदेवमेकत्र कार्य्ये समर्थेतर-स्वभावतया प्रतिक्षणं भेदात् घटस्य सपक्षत्वमक्षतम् ।

अत्र प्रयोगः । यद् यदा यज्जननव्यवहारयोग्यं तत्तदा तज्जनयत्येव । यथा अन्त्या कारणसामग्री स्वकार्य्यं । अतीतानागतक्षणभाविकार्य्यजननव्यवहार-योग्यश्चायं घटो वर्त्तमानक्षणभाविकार्य्यकरणकाले सकलक्रियातिक्रमकाले ऽपीति स्वभावहेतुप्रसङ्गः । अस्य च द्वितीयादिक्षणभाविकार्य्यकरणव्यवहार-गोचरत्वस्य प्रसङ्गसाधनस्य वार्त्तमानिककार्य्यकरणकाले सकलक्रियातिक्रमकाले च घटे धर्म्मिणि पराभ्युपग-ममाश्रितः सिद्धत्वात् असिद्धिस्तावदसम्भविनी । नापि विरुद्धता, सपक्षे अन्त्यकारणसामग्र्यां सद्भावसम्भवात् ।

नन्वयं साधारणानैकान्तिको हेतुः । साक्षाद्जनकेऽपि कुशूलाद्यवस्थित-वीजादौ विपक्षे समर्थव्यवहारगो-चरत्वस्य साधनस्य दर्शनादिति चेत् । न । द्विविधो हि समर्थ[1]व्यवहारः पारमार्थिकः औपचारिकश्च । तत्र यत्पारमार्थिकम् जननप्रयुक्तं जननव्यव[३]हारगोचरत्वं तदिह साधनत्वेनोपात्तं । तस्य च कुशूलाद्यवस्थित-

---

१ A सामर्थ्य० ।

वीजादौ कारणकारणत्वात् औपचारिकजननव्यवहार-विषयभूते सम्भवाभावात् कुतः साधारणानैकान्तिकता। न चास्य सन्दिग्धव्यतिरेकिता[1] विपर्य्यये बाधकप्रमाण-सद्भावात्। तथाहीदं जननव्यवहारगोचरत्वं नियत-विषयत्वेन व्याप्तमिति सर्व्वजनानुभवसिद्धम्[2]। न चेदं निर्निमित्तं। देशकालस्वभावनियमाभावप्रसङ्गात्। न चं जननादन्यन्निमित्तमुपलभ्यते। तद्न्वयव्यति-रेकानुविधानदर्शनात्।

यदि च जननमन्तरेणापि जननव्यवहारगोचरत्वं स्यात् तदा सर्व्वस्य सर्व्वच जननव्यवहार इत्यनियमः स्यात्। नियतश्चायं प्रतीतः। ततो जननाभावे विपक्षे नियतविषयत्वस्य व्यापकस्य निवृत्तौ निवर्त्तमानं जननव्यवहारगोचरत्वं जनन एव विश्राम्यतीति व्याप्तिसिद्धेरनवद्यो हेतुः। न चैष घटो वर्त्तमानकार्य्य-करणक्षणे सकलक्रियातिक्रमणे[3] च अतीतानागतक्षण-भाविकार्य्यं जनयति। ततो न जननव्यवहारयोग्यः। सर्व्वः प्रसङ्गः प्रसङ्गविपर्य्ययनिष्ठ इति न्यायात्।

अत्रापि प्रयोगः। यद्यदा यन्न करोति। तत्तदा

---

१ B ॰कता। २ A ॰प्रसिद्धम्। ३ A ॰क्रमकाले।

तच्च समर्थव्यवहारयोग्यं यथा शाल्यङ्कुरमकुर्व्वन् कोद्रवः शाल्यङ्कुरे। न करोति चैष घटो वर्त्तमानक्षणभाविकार्य्यकरणकाले सकलक्रियातिक्रमकाले चातीतानागतक्षणभाविकार्य्यमिति व्यापकानुपलब्धिर्भिनत्ति समर्थक्षणादसमर्थक्षणम्।

अचाप्यसिद्धिर्नास्ति वर्त्तमानक्षणभाविकार्य्यकरणकाले सकलक्रियातिक्रमकाले च अतीताना[1]गतक्षणभाविकार्य्यकरणस्यायोगात्[2]। नापि विरोधः सपक्षे भावात्। न चानैकान्तिकता पूर्व्वोक्तेन न्यायेन समर्थव्यवहारगोचरत्वजनकत्वयोर्विधिभूतयोः सर्व्वोपसंहारवत्या व्याप्तेः प्रसाधनात्।

यत्पुनरुक्तं यद्यदा यन्न करोति न तत्तदा तच्च समर्थमित्यत्र कः करोत्यर्थः। किं कारणत्वं? [3]तत्कार्य्योत्पादानुगुणसहकारिसाकल्यं? आहोस्वित् कार्य्याव्यभिचारः? कार्य्यसम्बन्धो वेति? तच्च कारणत्वमेव करोत्यर्थः। ततः पक्षान्तरभाविनो दोषा अनभ्युपगमप्रतिहताः।

न चाचपक्षे कारणत्वसामर्थ्ययोः पर्य्यायत्वेन व्याप-

---

१ A अतीतादिक्षण°। २ A असम्भवात्।

३ A has: तत्त for तत्।

कानुपलम्भस्य साध्याविशिष्टत्वमभिधातुमुचितं । समर्थव्यवहारगोचरत्वाभावस्य साध्यत्वात् । कारणत्वसमर्थव्यवहारगोचरत्वयोश्च दृक्षशिंशपयोरिव व्यावृत्तिभेदोऽस्तीत्यनवसर एव एवंविधस्य क्षुद्रप्रला[४]पस्य । तदेवं प्रसङ्गप्रसङ्गविपर्य्ययहेतुद्वयबलतो घटे दृष्टान्ते क्षणभङ्गः सिद्धः । तत्कथं सत्त्वादन्यदनुमानं दृष्टान्ते क्षणभङ्गसाधकम् । नास्तीत्युच्यते । न चैवं सत्त्वहेतोर्वैयर्थ्यं । दृष्टान्तमात्र एव प्रसङ्ग[१]प्रसङ्गविपर्य्ययाभ्यां क्षणभङ्गप्रसाधनात् नन्वाभ्यामेव पक्षेऽपि क्षणभङ्गसिद्धिरस्त्विति चेत् । अस्तु को दोषः । यो हि प्रतिपत्ता प्रतिवस्तु यद्यदा यज्जननव्यवहारयोग्यं तत्तदा तज्जनयतीत्यादिकमुपन्यसितुं अनलसस्तस्य तत एव क्षणभङ्गसिद्धिः । यस्तु प्रतिवस्तु तन्न्यायोपन्यासप्रयासभीरुः स त्वे[२]कधर्म्मिणि यद्यदा यज्जननव्यवहारयोग्यं तत्तदा तज्जनयतीत्यादिन्यायेन सत्त्वमात्रमस्यैर्य्यव्याप्तमवधार्य सत्त्वादेवान्यच्च क्षणिकत्वमवगच्छतीति । कथमप्रमत्तो वैयर्थ्यमस्याचक्षीत तदेवमेकार्थकारिणो घटस्य द्वितीयादिक्षणभाविकार्य्यापेक्षया समर्थेतरस्वभावविरुद्धधर्म्मा-

---

१ A प्रसङ्गतद्विपर्य्ययाभ्यां ।

२ A चकधर्म्मिणि ।

३ A चकान्तरभावि० ।

ध्यासात् भेद एवेति क्षणभङ्गतया सपक्षतामावहति घटे सत्त्वहेतुरुपलभ्यमानो न विरुद्धः।

न चायमनैकान्तिकः। अत्रैव साधर्म्यवति दृष्टान्ते सर्व्वोपसंहारवत्या व्याप्तेः प्रसाधनात्। ननु विपर्य्यये बाधकप्रमाणबलाद्व्याप्तिसिद्धिस्तस्य चोपन्यासवार्त्तापि नास्ति तत्कथं व्याप्तिः प्रसाधितेति चेत्। तदेतत् तर(४)लतरबुद्धिविलसितं। तथा हि उक्तमेतत् वर्त्तमानक्षणभाविकार्य्यकरणकाले अतीतानागतक्षणभाविकार्य्येऽपि घटस्य शक्तिसम्भवे तदानीमेवैतत् करणमकरणे च शक्ताशक्तस्वभावतया प्रतिक्षणं भेद इति क्षणिकत्वेन व्याप्तैव सा अर्थक्रियाशक्तिः।

नन्वेवं अन्वयमात्रमस्तु विपक्षात् पुनरेकान्तेन व्यावृत्तिरिति कुतो लभ्यमिति चेत्, व्याप्तिसिद्धेरेव। व्यतिरेकसन्देहे व्याप्तिसिद्धिरेव कथमिति चेत्, न। द्विविधा हि व्याप्तिसिद्धिरन्वयरूपा च कर्त्तृधर्म्मः। साधनधर्म्मवति धर्म्मिणि साध्यधर्म्मस्यावश्यभावो यः। व्यतिरेकरूपा च कर्म्मधर्म्मः साध्याभावे साधनस्यावश्यमभावो यः। एनयोश्चैकतरप्रतीतिनियमेन द्वितीय-

---

१ A न चानैकान्तिकः।

[1]प्रतीतिमाक्षिपति। अन्यथा, एकस्याः एव सिद्धः। तस्माद्। यथा विपर्य्यये बाधकप्रमाणबलात् नियमवति व्यतिरेके सिद्धे अन्वयविषयः संशयः पूर्व्वं स्थितोऽपि पश्चात्परिगलति। ततोऽन्वयप्रसाधनार्थं न पृथक्-साधनमुच्यते। तथा प्रसङ्गतद्विपर्य्ययहेतुद्वयबलतो नियमवत्यन्वये सिद्धे व्यतिरेकविषये[2] पूर्व्वं स्थितोऽपि सन्देहः पश्चात्परिगलत्येव। न च व्यतिरेकसाधक[3]मन्यत् प्रमाणं वक्तव्यम्। ततश्च साध्याभावे साधनस्यैकान्तिको व्यतिरेकः। साधने सति साध्यस्यावश्यमन्वयो वे[4][पू]ति न कश्चिदर्थभेदः तदेवं विपर्य्ययबाधकप्रमाणमन्तरेणापि प्रसङ्गप्रसङ्गविपर्य्ययहेतुद्वयबलात् अन्वयरूपव्याप्तिसिद्धौ सत्त्वहेतोरनैकान्तिकस्याभावादतः साधनात् क्षणभङ्ग-सिद्धिरनवद्येति।

ननु च साधनमिदमसिद्धं, न हि कारणबुद्ध्या कार्य्यं गृह्यते। तस्य भावित्वात्। न च कार्य्यबुद्ध्या कारणम्। तस्यातीतत्वात्। न च वर्त्तमानग्राहिणा ज्ञानेन अतीता-नागतयोर्ग्रहणमतिप्रसङ्गात्। न च पूर्व्वापरयोः

---

१ A द्वितीयमाक्षिपति। २ A विषये। ३ A ०न।

४ A has not got the fourth leaf. अवश्यं precedes साधनस्य।

कालयोरेकः प्रतिसन्धाताऽस्ति क्षणभङ्गभङ्गप्रसङ्गात् । कारणाभावे तु कार्य्याभावप्रतीतिः स्वसम्वेदनवादिनो मनोरथस्याप्यविषयः । न च पूर्व्वोत्तरकालयोः सम्बित्ती ताभ्यां वासना तया च हेतुफलावसायी विकल्प इति युक्तं । स हि विकल्पो गृहीतानुसन्धायकोऽतद्रूपसमारोपको वा न प्रथमः पक्षः । एकस्य प्रतिसन्धातुरभावे पूर्व्वापरग्रहणयोरयोगात् । विकल्पवासनाया एवाभावात् । नापि द्वितीयः; मरीचिकायामपि जलविज्ञानप्रामाण्यप्रसङ्गात् । तदेवमन्वयव्यतिरेकयोरप्रतिपत्तेरर्थक्रियालक्षणम् सत्त्वमसिद्धमिति ॥

किञ्च प्रकारान्तरादपीदं साधनमसिद्धं । तथा हि वीजादीनां सामर्थ्यं वीजादिज्ञानात् कार्य्यादङ्कुरादेर्वा निश्चेतव्यं । कार्य्यत्वञ्च वस्तुत्वसिद्धौ सिध्यति, वस्तुत्वञ्च कार्य्यान्तरात् । कार्य्यान्तरस्यापि कार्य्यत्वं वस्तुत्वसिद्धौ । तद्वस्तुत्वञ्च तत्परकार्य्यान्तरादित्यनवस्था । अथानवस्थाभयात् पर्य्यन्ते कार्य्यान्तरं नापेक्षते, तदा तेनैव पूर्व्वेषामसत्त्वप्रसङ्गात् नैकस्याप्यर्थक्रियासामर्थ्यं सिध्यति । ननु कार्य्यत्वसत्त्वयोर्भिन्नव्यावृत्तिकत्वात् । सत्तासिद्धावपि कार्य्यत्वसिद्धौ का क्षतिरिति चेत् । तदसङ्गतम्, सत्यपि कार्य्यत्वसत्त्वयोर्व्यावृत्तिभेदे सत्त्वसिद्धौ

कुतः कार्य्यत्वसिद्धिः। कार्य्यत्वं ह्यभूत्वाभावित्वं, भवनञ्च सत्ता। सत्ता च सौगतानां सामर्थ्यमेव। ततश्च सामर्थ्यसन्देहे भवतीत्येव वक्तुमशक्यं कथमभूत्वाभावित्वं कार्य्यत्वं सेत्स्यति। अपेक्षितपरव्यापारत्वं कार्य्यत्वमित्यपि नासतो धर्म्मः सत्त्वञ्च सामर्थ्यं तच्च सन्दिग्धमिति कुतः कार्य्यसिद्धिः। तदसिद्धौ पूर्व्वस्य सामर्थ्यं न सिध्यतीति सन्दिग्धासिद्धो हेतुः।

तथा विरुद्धोऽप्ययं, तथा हि क्षणिकत्वे सति न तावत् अजातस्यानन्वयनिरुद्धस्य वा कार्य्यारम्भकत्वं सम्भवति। न च निष्पन्नस्य तावान् क्षणोऽस्ति यमुपादाय कस्मैचित् कार्य्याय व्यापार्य्येत्। अतः क्षणिकपक्ष एव अर्थक्रियानुपपत्तेर्विरुद्धता। अथवा विकल्पेन यदुपनीयते, तत्सर्व्वमवस्तु, ततश्च वस्त्वात्मके क्षणिकत्वे साध्येऽवस्तूपस्थापयन्ननुमानविकल्पो विरुद्धः। [६] यद्वा, सर्व्वस्यैव हेतोः क्षणिकत्वे साध्ये विरुद्धत्वं देशकालान्तराननुगमे साध्यसाधनभावाभावात् अनुगमे च नानाकालमेकमक्षणिकं क्षणिकत्वेन विरुध्यत इति।

अनैकान्तिकोऽप्ययं सत्त्वस्थैर्य्ययोर्विरोधाभावादिति।

प्रचोच्यते।

यत्तावदुक्तं सामर्थ्यं न प्रतीयत इति। तत् किं सर्व्वथैव न प्रतीयते। क्षणभङ्गपक्षे वा।

प्रथमपक्षे सकलकारकज्ञापकहेतुचक्रोच्छेदात् मुखस्यन्दनमात्रस्याप्यकरणप्रसङ्गः। अन्यथा येनैव वचनेन सामर्थ्यं नास्तीति प्रतिपाद्यते तस्यैव तत् प्रतिपादनसामर्थ्यमव्याहतमायातम्। तस्मात् परमपुरुषार्थसमीहया वस्तुतत्त्वनिरूपणप्रवृत्तस्य शक्तिस्वीकारपूर्व्वकैव प्रवृत्तिः। तदस्वीकारे तु न कश्चित् क्वचित् प्रवर्त्तेतेति निरीहं जगज्जायते। अथ द्वितीयः पक्षः। तदास्ति तावत् सामर्थ्यप्रतीतिः। सा च क्षणिकत्वे यदि नोपपद्यते तदा विरुद्धं वक्तुमुचितं, असिद्धमिति तु न्यायभूषणीयः प्रायोविलापः। न च सत्यपि क्षणिकत्वे सामर्थ्यप्रतीतिव्याघातः[1]। तथाहि कारणज्ञानोपादेयभूतेन[2] कार्य्यग्राहिणा ज्ञानेन तदर्पितसंस्कारगर्भेण अस्य भावे अस्य भाव इति अन्वयनिश्चयो जन्यते, तथा कारणापेक्षया भूतलकैवल्यग्राहिज्ञानोपादेयभूतेन कार्य्यापेक्षया भूतलकैवल्यग्राहिणा ज्ञानेन तदर्पितसंस्कारगर्भेण अस्याभावे अस्याभाव इति व्यतिरेकनिश्चयो जन्यते। यदाहुर्गुरवः।

---

१ A ०क्तिः। २ A कारणग्राहिज्ञानोपादेयभूतेन।

एकावसायसमनन्तरजातमन्य-
विज्ञानमन्वयविमर्षमुपादधाति ।
एवं तदेकविरहानुभवोद्भवान्य-
व्यावृत्तधीः प्रथयति व्यतिरेकबुद्धिं ॥

एवं सति गृहीतानुसन्धायके एवायं विकल्पः । उपादानोपादेयभूतक्रमिप्रत्यक्ष[1]द्वयगृहीतानुसन्धानात् । यदाहालङ्कारः ।

यदि नामैकमध्यक्षं न पूर्व्वापरवित्तिमत्[2] ।
अध्यक्षद्वयसद्भावे प्राक्परावेदनं कथमिति ।

नापि द्वितीयो[3]ऽसिद्धप्रभेदः । सामर्थ्यं हि सत्त्वमिति सौगतानां स्थितिरेषा । न चैतत् प्रसाधनार्थमस्माकमिदानीमेव प्रारम्भः ; किन्तु यच्च प्रमाणप्रतीते वीजादौ वस्तुभूते धर्म्मिणि प्रमाणप्रतीतं सामर्थ्यं तच्च क्षणभङ्ग[4]साधनाय । ततश्चाङ्कुरादीनां कार्य्यादर्शनात् आहत्य-सामर्थ्यसन्देहेऽपि पटुप्रत्यक्षप्रसिद्धं सन्मात्रत्वमवधार्य्यमेव । अन्यथा न क्वचिदपि वस्तुमात्रस्यापि प्रतिपत्तिः स्यात् । तस्माच्छास्त्रीयसत्त्वलक्षणसन्देहेऽपि पटुप्रत्यक्षवलावलम्बितवस्तुभावे अङ्कुरादौ कार्य्यत्व-

---

१ A ॰प्रत्यय॰ । २ A ॰दृत्तिमत् ।
३ A ॰सिद्धि॰ । ४ A ॰प्रसाधनाय ।

मुपलभ्यमानं बीजादेः सामर्थ्यमुपस्थापयतीति नासिद्धि-दोषावकाशः ।

नापि क्षणिकत्वे[1] सामर्थ्यक्षतिः, यतो विरुद्धता स्यात्, क्षणिकत्वनियतप्राग्भावित्वलक्षणकारणत्वयोर्वि[७]-रोधाभावात्, क्षणमात्रस्थायिन्यपि सामर्थ्यसम्भवादिति नादिमो विरोधः । नापि द्वितीयो विरोधप्रभेदः । अवस्तुनो वस्तुनो वा स्वाकारस्य ग्राह्यत्वेऽपि, अध्यवसेयवस्त्वपेक्षयैव सर्व्वत्र प्रामाण्यप्रतिपादनात् वस्तुस्वभावस्यैव क्षणिकत्वसिद्धिरिति क्व विरोधः ।

यच्च गृह्यते यच्चाध्यवसीयते ते द्वे अपि अन्यनिवृत्ती न वस्तुनी स्वलक्षणावगाहित्वे अभिलापसंसर्गानुप-पत्तेरिति चेत् । न । अध्यवसायस्वरूपापरिज्ञानात् अगृहीतेऽपि वस्तुनि मानस्यादिप्रवृत्तिकारकत्वं विकल्पस्याध्यवसायित्वं, अप्रतिभासेऽपि प्रवृत्तिविषयी-कृतत्वमध्यवसेयत्वम् । एतच्चाध्यवसेयत्वं स्वलक्षणस्यैव युज्यते, नान्यस्य । अर्थक्रियार्थित्वात् अर्थिप्रवृत्तेः । एवञ्चाध्यवसाये स्वलक्षणस्यास्फुरणमेव । न च तस्या-स्फुरणेऽपि सर्व्वत्राविशेषेण प्रवृत्त्याक्षेपप्रसङ्गः, प्रति-नियतसामग्रीप्रहृतात्, प्रतिनियतस्वाकारात्, प्रति

[1] A चधिकल० ।

नियतशक्तियोगात्, प्रतिनियत एवातद्रूपपरावृत्ते[1] अप्रतीतेऽपि प्रवृत्तिसामर्थ्यदर्शनात् । यथा सर्वस्यासत्त्वेऽपि बीजादङ्कुरस्यैवोत्पत्तिः दृष्टस्य नियतहेतुफलभावस्य प्रतिक्षेप्तुमशक्यत्वात् । परं वाह्येनार्थेन सति प्रतिबन्धे प्रामाण्यमन्यथात्वप्रामाण्यमिति विशेषः ।

तथा तृतीयोऽपि पक्षः प्रयासफलः । नानाकालस्यैकस्य वस्तुनो वस्तुतोऽसम्भवेऽपि तद्रूपपरावृत्तयोरेव साध्यसाधनयोः प्रत्यक्षेण व्याप्तिग्रहणात् । द्विविधो हि प्रत्यक्षस्य विषयो ग्राह्योऽध्यवसेयश्च सकलातद्रूपपरावृत्तं वस्तुमात्रं साक्षादस्फुरणात् प्रत्यक्षस्य ग्राह्यो विषयो मा भूत् । तदेकदेशग्रहणे तु तन्मात्रयोर्व्याप्तिनिश्चायकविकल्पजननाद्ध्यवसेयो विषयो भवत्येव । क्षणग्रहणे सन्ताननिश्चयवत् । रूपमात्रग्रहणे घटनिश्चयवच्च । अन्यथा सर्वानुमानोच्छेदप्रसङ्गात् । तथा हि व्याप्तिग्रहः सामान्ययोः, विशेषयोः, सामान्यविशिष्टविशेषयो र्विशेषविशिष्टसामान्ययो[2]र्वेति विकल्पाः । नाद्यो विकल्पः सामान्यस्य बाध्यत्वात् । अबाध्यत्वेऽप्यदृश्यत्वात् । दृश्यत्वेऽपि पुरुषार्थानुपयोगितया तस्यानुमेयत्वायोगात् ।

---

१ A एव खलक्षणे ।

२ A सामान्यविशिष्टखलक्षणयोः खलक्षणविशिष्टसामान्ययोः ।

नाप्यनुमितात्[1] सामान्यात् विशेषानुमानम्, सामान्यसर्व्वविशेषयोर्वृक्ष्यमाणन्यायेन प्रतिबन्धप्रतिपत्तेरयोगात्। नापि द्वितीयो विशेषस्याननुगामित्वात्। अन्तिमे तु विकल्पद्वये सामान्याधारतया दृष्ट एव विशेषः सामान्यस्य विशेष्यो विशेषणं वा कर्त्तव्यः। अदृष्ट एव वा देशकालान्तरवर्त्ती। यद्वा दृष्टादृष्टात्मको देशकालान्तरवर्त्ती अतद्रूपपरावृत्तः सर्व्वो विशेषः। न प्रथमः पक्षोऽननुगामित्वात्; नापि द्वितीयः, अदृष्टत्वात्। न च तृतीयः, प्रस्तुतैकविशेषदर्शनेऽपि देशका-[८]लान्तरवर्त्तिनामदर्शनात्।

अथ तेषां सर्व्वेषामेव विशेषाणां सदृशत्वात्। सदृशसामग्रीप्रहृतत्वात् सदृशकार्य्यकारित्वादिति प्रत्यासत्त्या, एकविशेषग्राहकं प्रत्यक्षमतद्रूपपरावृत्तमात्रे निश्चयं जनयदतद्रूपपरावृत्तविशेषमात्रस्य व्यवस्थापकम्। यथैकसामग्रीप्रतिबद्धरूपमात्रग्राहकं प्रत्यक्षं घटे निश्चयं जनयद्घटग्राहकं व्यवस्थाप्यते। अन्यथा घटोऽपि घटसन्तानोऽपि प्रत्यक्षतो न सिध्येत् सर्व्वात्मना ग्रहणाभावात्। तदेकदेशग्रहणन्वतद्रूपपरावृत्तेऽप्यविशिष्टम्। यद्येवमनेनैव क्रमेण सर्व्वस्य विशेषस्य विशेषणविशेष्य-

---

१ A has not the sixth leaf.

भाववत् व्याप्तिप्रतिपत्तिरप्यस्तु । तत् किमर्थं नानाकालमेकक्षणिकमभ्युपगन्तव्यं येन क्षणिकत्वे साधनस्य विरुद्धत्वं स्यात् इति न कश्चिद्विरोधप्रभेदप्रसङ्गः ।

न चायमनैकान्तिकोऽपि हेतुः । पूर्वोक्तक्रमेण साधर्म्यदृष्टान्ते प्रसङ्गविपर्य्ययहेतुभ्यामन्वयरूपव्याप्तेः प्रसाधनात् । ननु यदि प्रसङ्गविपर्य्ययहेतुद्वयबलतो घटे दृष्टान्ते क्षणभङ्गः सिध्येत्तदा सत्त्वस्य नियमेन क्षणिकत्वेन व्याप्तिसिद्धेरनैकान्तिकत्वं न स्यादिति युक्तम् । केवलमिदमेवासम्भवि । तथाहि शक्तोऽपि घटः क्रमिसहकार्य्यपेक्षया क्रमिकार्य्यं करिष्यति ।

न चैतद् वक्तव्यं समर्थो ऽर्थः स्वरूपेण करोति । स्वरूपञ्च सर्व्वदास्तीत्यनुपकारिणि सहकारिण्यपेक्षा न युज्यत इति, सत्यपि स्वरूपेण कारकत्वे सामर्थ्याभावात्कथं करोति, सहकारिसाकल्यं हि सामर्थ्यं तद्वैकल्यञ्चासामर्थ्यं । न च तयोराविर्भावतिरोभावाभ्यां तद्वतः काचित् क्षतिः । तस्य ताभ्यामन्यत्वात् । तस्मादर्थः समर्थोऽपि स्यात् न च करोतीति सन्दिग्धव्यतिरेकः प्रसङ्गहेतुः ।

अत्रोच्यते । भवतु तावत् सहकारिसाकल्यमेव सामर्थ्यं । तथापि सोऽपि तावद्भावः स्वरूपेण कारकः ।

तस्य च यादृशश्चरमक्षणे ऽक्षेपक्रियाधर्म्मा स्वभावः तादृश एव चेत् प्रथमक्षणे तदा तदापि प्रसङ्ग कुर्व्वाणो ब्रह्मणाप्यनिवार्य्यः। न च सोऽप्यक्षेपक्रियाधर्म्मा स्वभावः साकल्ये सति जातो भावाद्भिन्न एवाभिधातुं शक्यः। भावस्याकर्त्तृत्वप्रसङ्गात्। एवं यावद्यावत् धर्मान्तरपरिकल्पस्तावत्तावदुदासीनो भावः। तस्माद्यद्रूपमादाय स्वरूपेणापि जनयतीत्युच्यते; तस्य प्रागपि भावे कथमजनिः कदाचित्। अक्षेपक्रियाप्रत्यनीकस्वभावस्य प्राच्यस्य पश्चादनुवृत्तौ कथं कदाचिदपि कार्य्यसम्भवः। ननु यदि स एवैकः कर्त्ता स्यात् युक्तमेतत्। किन्तु सामग्री जनिका ततः सहकार्य्यन्तरविरहवेलायां बलीयसोऽपि न कार्य्यप्रसव इति किमत्र विरुद्धं। न हि भावः स्वरूपे[ई]ण करोतीति स्वरूपेणैव करोति। सहकारिसहितादेव ततः कार्य्योत्पत्तिदर्शनात्। तस्माद्वह्निवत् कार्य्यकारणभावोऽपि, एकत्रान्ययोगव्यवच्छेदेन अन्यत्रायोगव्यवच्छेदेन नावबोद्धव्यः, तथैव लौकिकपरीक्षकाणां सम्प्रतिपत्तेरिति।

अत्रोच्यते। यदा मिलिताः सन्तः कार्य्यं कुर्व्वते तदैकार्थकरणलक्षणं सहकारित्वमेषामस्तु को निषेद्धा? मिलितैरेव तु तत्कार्य्यं कर्त्तव्यमिति कुतो लभ्यते?

पूर्व्वापरयोरेकस्वभावत्वाद्भावस्य । सर्व्वदा जननाजननयोरन्यतरनियत[1]प्रसङ्गस्य दुर्व्वारत्वात् । तस्मात् सामग्रौ जनिका नैकं जनकमिति स्थिरवादिनां मनोरथस्याप्यविषयः । दृश्यते तावदेवमिति चेत् । दृश्यतां किन्तु पूर्व्वस्थितादेव सामग्रीमध्यप्रविष्टाद्भावात् कार्य्योत्पत्तिरन्यस्मादेव वा विशिष्टाद्भावादुत्पन्नादिति विवादपदम् । तच्च प्रागपि सम्भवे सर्व्वदैव कार्य्योत्पत्ति र्न वा कदाचिदपीति विरोधमसमाधाय चक्षुषी निमील्य तत एव कार्य्योत्पत्तिदर्शनादिति साध्यानुवाद[2]मात्रप्रवृत्तः कृपामर्हतीति । न च प्रत्यभिज्ञादि[3]बलादेकत्वसिद्धिः तत् पौरुषस्य लूनपुनर्जातकेशन[4]खादावप्युपलम्भतो निर्दलनात्, लक्षणभेदस्य च दर्शयितुमशक्यत्वात् । स्थिरसिद्धिदूषणे चास्माभिः प्रपञ्चतो निरस्तत्वात् । तस्मात् साक्षात् कार्य्यकारणभावापेक्षया[5] उभयचाप्यन्ययोगव्यवच्छेदः । व्याप्तौ तु साक्षात्परम्परया कारणमात्रापेक्षया कारणे व्यापकेऽयोगव्यवच्छेदः । कार्य्ये व्याप्ये[6]ऽन्ययोगव्यवच्छेदः । तथा[7] तदतत्स्वभावे व्यापकेऽयोगव्यवच्छेदः । तत्स्वभावे च

---

१ A ॰नियम॰ । २ A omits ॰मात्र॰ । ३ A omits ॰आदि॰ ।
४ A omits ॰नख॰ । ५ A omits व्याप्ये । ६ A तदा ।

व्याप्येऽन्ययोगव्यवच्छेदो विकल्यारूढरूपापेक्षया व्याप्तौ द्विविधमवधारणम्,। ननु यदि पूर्व्वापरकालयोरेकस्वभावो भावः सर्व्वदाजनकत्वेनाजनकत्वेन वा व्याप्त उपलब्धः स्यात्तदायं प्रसङ्गः सङ्गच्छते। न[1] क्षणभङ्गवादिना पूर्व्वापरकालयोरेकः कश्चिदुपलब्ध इति चेत्। तदेतदतिग्राम्यं। तथाहि पूर्व्वापरकालयोरेकस्वभावत्वे सतीत्यस्यायमर्थः। परकालभावी जनको यः स्वभावो भावस्य स एव यदि पूर्व्वकालभावी। पूर्व्वकालभावी वा योऽजनकः स्वभावः स एव यदि परकालभावी, तदोपलब्धमेव जननमजननम्वा स्यात्, तथा च सति सिद्धयोरेव स्वभावयोरेकत्वारोपे सिद्धमेव जननमजननम्वाऽसज्यत इति।

ननु कार्य्यमेव[2] सहकारिणमपेक्षते। न तु कार्य्योत्पत्तिहेतुः। यस्मात् द्विविधं सामर्थ्यं निजमागन्तुकञ्च सहकार्य्यन्तरं ततोऽक्षणिकस्यापि क्रमवत् सहकारिनानात्वादपि क्रमवत् कार्य्यनानात्वोपपत्तेरशक्यं भावानां प्रतिक्षणमन्यान्य[१०]त्वमुपपादयितुमिति चेत्। उच्यते[3]। भवतु तावन्निजागन्तुकभेदेन द्विविधं सामर्थ्यं। तथापि यत् प्रातिस्विकं वस्तुस्वलक्षणं अर्थ[4]-

१ A adds च।
२ A adds हि।
३ A omits उच्यते।
४ B has सद्यः for अर्थ०।

क्रियाधर्म्मकमवश्यमभ्युपगन्तव्यं तत् किं प्रागपि पश्चादेव वेति विकल्प्य यद्दूषणमुद्भावितं[1]। तच्च किमुक्तमनेनेति न प्रतीमः। यत्तु कार्य्येणैव सहकारिणोऽपेक्षन्त इत्युपस्कृतं तदपि निरुपयोगं। यदि हि कार्य्यमेव स्वजन्मनि स्वतन्त्रं स्याद्युक्तमेतत्। केवलमेवं सति सहकारिसाकल्य[2]सामर्थ्यकल्पनमफलं। स्वातन्त्र्यादेव हि कार्य्यं कादाचित्कं भविष्यति। तथा च सति सन्तो हेतवः सर्व्वथाऽसमर्थाः। असदेतत्[3] कार्य्यं स्वतन्त्रमिति विमुग्धा बुद्धिः। अथ कार्य्यस्यैवायमपराधो यदिदं समर्थे कारणे सत्यपि कदाचिन्नोपपद्यत इति चेत्। न। तत्तर्हि तत् कार्य्यं स्वातन्त्र्यात्। यद्भाष्यं।

सर्व्वावस्थासमानेऽपि कारणे यद्यकार्य्यता।
स्वतन्त्रं कार्य्यमेवं स्यान्नतत्कार्य्यन्तथा सति॥

अथ न तद्भावे भवतीति तत्कार्य्यमुच्यते, किन्तु तदभावेन भवत्येवेति, व्यतिरेकप्राधान्यादिति चेत्। न। यदि हि स्वयमभवन् भावयेदेव हेतुः स्वकार्य्यं तदा तदभावप्रयुक्तोऽस्याभाव इति प्रतीतिः स्यात्[4]। नो चेद् यथा कारणे सत्यपि कार्य्यस्वातन्त्र्यान्न भवति।

---

१ A उदीरित०।  २ A omits साकल्य०
३ A असत्।  ४ A omits स्यात्।

तथा तद्भावेऽपि स्वातन्त्र्यादेव न भूतमिति शङ्का केन निवार्य्येत। यद्वाच्यं।

तद्भावेऽपि न भावश्चेदभावेऽभाविता कुतः।
तदभावप्रयुक्तोस्य सोऽभाव इति तत् कुतः॥

तस्माद् यथैव तद्भावे नियमेन न भवति। तथैव तद्भावे नियमेन भवेदेव। अभवच्च न तत्कारणतामात्मनः क्षमते। यच्चोक्तं, प्रथमकार्य्योत्पादनकाले ह्युत्तरकार्य्योत्पादनस्वभावः। अतः प्रथमकाल एवाशेषाणि कार्य्याणि कुर्य्यादिति। तदिदं माता मे वन्ध्येत्यादिवत् स्ववचननिरोधादयुक्तं, यो ह्युत्तरकार्य्यजननस्वभावः स कथमादौ कार्य्यं[1] कुर्य्यात्। न तर्हि तत्कार्य्यकरणस्वभावः न हि नीलोत्पादनस्वभावः पीतादिकमपि करोतीति।

अत्रोच्यते। स्थिरस्वभावत्वे हि भावस्य उत्तरकालमेवेदं कार्य्यं न पूर्व्वकालमिति कुत एतत्। तदभावाच्च कारणमपि उत्तरकार्य्यकरणस्वभावमित्यपि कुतः। किं कुर्म्मः उत्तरकालमेव तस्य जन्मेति चेत्; अस्तु स्थिरत्वे तदनुपपद्यमानमस्थिरतामादिशतु; स्थिरत्वेप्येष एव[2] स्वभावस्तस्य यदुत्तरक्षण एव करो-

१ A omits कार्य्यं। २ A omits एव।

तौति चेत्। उतेदानीं प्रमाणप्रत्याशा। धूमाद्[1]ग्नि-रित्यत्रापि स्वभाव एवास्य यदिदानीमत्र निरग्निरपि धूम इति वक्तुं शक्यत्वात्। तस्मात् प्रमाणसिद्धे स्वभावावलम्बनं, न तु स्वभावावलम्बनेन प्रमाणव्यालोपः। तस्माद् यदि कारणस्यो[११]त्तरकार्य्यकारकत्वमभ्युपगम्य कार्य्यस्य प्रथमक्षणभावित्वमासज्यते, स्यात् स्ववचन-विरोधः। यदा तु कारणस्य स्थिरत्वे कार्य्यस्योत्तर-कालत्वमेवासङ्गतम्। अतः कारणस्याप्युत्तरकार्य्यजन-कत्वं वस्तुतोऽसम्भवि तदा प्रसङ्गसाधनमिदं। जनन-व्यवहारगोचरत्वं हि जननेन व्याप्तमिति प्रसाधितं। उत्तरकार्य्यजननव्यवहारगोचरत्वञ्च त्वदभ्युपगमात् प्रथमकार्य्यकरणकाल एव घटे धर्म्मिणि सिद्धं। अत-स्तन्माचानुबन्धिन उत्तराभिमतस्य कार्य्यस्य प्रथमे क्षणेऽसम्भवादेव प्रसङ्गः क्रियते। न हि नीलकारकेऽपि पीतकारकत्वारोपे पीतसम्भवप्रसङ्गः स्ववचनविरोधो[2]-नाम। तदेवं शक्तः सहकार्य्यनपेक्षितत्वात् जननेन व्याप्तः। अजनयंश्च शक्ताशक्तत्वविरुद्धधर्म्माध्यासाद्भिन्न एव। ननु भवतु प्रसङ्गविपर्य्ययबलादेककार्य्यं प्रति-शक्ताशक्तत्वलक्षणविरुद्धधर्म्माध्यासः। तथापि न ततो

---

१ A adds च।  २ A °विरुद्धो।

भेदः सिध्यति; तथाहि बीजमङ्कुरादिकं कुर्व्वद् यदि येनैव स्वभावेनाङ्कुरं करोति तेनैव क्षित्यादिकन्तदा-क्षित्यादीनामप्यङ्कुरस्वाभाव्यापत्तिः। नानास्वभावत्वेन तु[1] कारकत्वे स्वभावानामन्योन्याभावाव्यभिचारित्वा-देकच भावाभावौ परस्परविरुद्धौ स्यातामित्येकमपि बीजं भिद्येत। एवं प्रदीपोऽपि तैलक्षयवर्त्तिदाहादिकं; तथा पूर्व्वरूपमप्युत्तररूपरसगन्धादिकमनेकैः स्वभावैः परिकरितं करोति। तेषाञ्च स्वभावानामन्योन्या-भावाव्यभिचारादविरुद्धानां योगे प्रदीपादिकं भिद्येत। न च भिद्यते। तन्न! विरुद्धधर्म्माध्यासो भेदकः, तथा-बीजस्याङ्कुरं प्रति कारकत्वं गर्दभादिकं प्रत्यकारकत्व-मिति कारकत्वाकारकत्वे अपि विरुद्धौ धर्म्मौ। न च तद्योगेऽपि बीजभेदः। तदेवमेकच बीजे प्रदीपे रूपे च विपक्षे परिदृश्यमानः शक्ताशक्तत्वादिर्विरुद्धधर्म्माध्यासो न घटादेर्भेदक इति।

अत्र ब्रूमः। भवतु तावद्बीजादीनामनेककार्य्य-कारित्वाद्धर्म्मभूतानेकस्वभावभेदस्तथापि कः प्रस्तावो विरुद्धधर्म्माध्यासस्य। स्वभावानां ह्यन्योन्याभावा-व्यभिचारे भेदः प्राप्तावसरो न विरोधः। विरोधस्तु

१ A •स्वभावेन and omits तु।

यद्विधाने यन्निषेधो यन्निषेधे यद्विधानं तयोरेकधर्म्मिणि परस्परपरिहारस्थिततया स्यात्। तद्यथैकः स्वभावः स्वाभावेन विरुद्धो युक्तो भावाभाववत्। न तु स्वभावान्तरेण। घटत्ववस्तुत्ववत्। एवमङ्कुरादिकारित्वं तदकारित्वेन विरुद्धं न पुनर्वस्त्वन्तरकारित्वेन[१]। प्रत्यक्षव्यापारश्चाच यथा नानाधर्म्मैरध्यासितं भावमभिन्नं व्यवस्थापयति। तथा तत्कार्य्यकारिणं कार्य्यान्तराकारिणञ्च। तद्यदि प्रतियोगित्वाभावादन्योन्याभावाव्यभिचारि [१२] णावपि स्वभावाविरुद्धौ तत्कारकत्वान्याकारकत्वे वा विषयभेदादविरुद्धे, तत् किमायातमेककार्य्यम्प्रति शक्ताशक्तत्वयोः परस्परप्रतियोगिनोर्विरुद्धयोर्धर्म्मयोः। एतयोरपि पुनरविरोधे विरोधो नाम दत्तजलाञ्जलिः। भवतु तर्ह्येककार्य्यापेक्षयैव सामर्थ्यासामर्थ्ययोर्विरोधः। केवलं यथा तदेव कार्य्यं प्रति क्वचिद्देशे शक्तिर्देशान्तरे चाशक्तिरिति देशभेदादविरुद्धे शक्त्यशक्ती तथैकचैव कार्य्ये कालभेदादप्य[२]विरुद्धे। यथापूर्व्वं[३]न्निःक्रियः स्फटिकः स एव पश्चात् सक्रिय इति चेत्।

---

१ B वस्त्वन्तराकारित्वेन।

२ A omits अपि ३ B पूर्व्ववत्।

उच्यते। न हि वयं परिभाषामात्रादेकत्र कार्य्ये देशभेदादविरुद्धे शक्त्यशक्ती ब्रूमः। किन्तु विरोधाभावात्। तद्देशकार्य्य[1]कारित्वं हि तद्देशकार्य्याकारित्वेन विरुद्धं। न पुनर्देशान्तरे तत्कार्य्याकारित्वेनान्यकार्य्यकारित्वेन वा। यद्येवन्तत्कालकार्य्यकारित्वं तत्कालकार्य्याकारित्वेन विरुद्धं। न पुनः कालान्तरे तत्कार्य्याकारित्वेनान्यकार्य्यकारित्वेन वा। तत्कथं कालभेदेऽपि विरोध इति चेत्। उच्यते। द्वयोर्हि धर्म्मयोरेकत्रधर्म्मिण्यनवस्थितिनियमः परस्परपरिहारस्थितिलक्षणो विरोधः। स च साक्षात्परस्परप्रत्यनीकतया भावाभाववद्वा भवेत्। एकस्य वा[2] नियमेन प्रमाणान्तरेण बाधनान्नित्यत्वसत्त्ववद्वा भवेदिति न कश्चिदर्थभेदः। तदत्रैकधर्म्मिणि तत् कालकार्य्यकारित्वाधारे कालान्तरे तत्कार्य्याकारित्वस्यान्यकार्य्यकारित्वस्य वा नियमेन प्रमाणान्तरेण बाधनाद्विरोधः। तथा हि यत्रैव धर्म्मिणि तत्कालकार्य्यकारित्वमुपलब्धन्न तत्रैव कालान्तरे तत् कार्य्याकारित्वमन्यकार्य्यकारित्वं वा ब्रह्मणाप्युपसंहर्त्तुं शक्यते, येनानयोरविरोधः स्यात्। क्षणान्तरे कथित-

१ A omits 'कार्य्य'। २ A omits वा।

प्रसङ्गविपर्य्ययहेतुभ्यामवश्यम्भावेन धर्म्मिभेदप्रसाधनात् । न च प्रत्यभिज्ञानादेकत्वसिद्धिः । तत् पौरुषस्य निर्म्मूलितत्वात् । अत एव वज्रोऽपि पक्षकूक्षौ निक्षिप्तः कथमसौ स्फटिको वराकः कालभेदेनाभेदसाधनाय दृष्टान्तीभवितुमर्हति । न चैवं समानकालकार्य्याणां देशभेदेऽपि धर्म्मिभेदो युक्तो भेदसाधकप्रमाणाभावादिन्द्रियप्रत्यक्षेण निरस्तविभ्रमाशङ्केनाभेदप्रसाधनाच्च । इति न कालभेदेऽपि शक्त्यशक्त्योर्विरोधः स्वसमयमाचादपहस्तयितुं शक्यः । समयप्रमाणयोरप्रवृत्तेरिति ।

तस्मात् सर्व्वच विरुद्धधर्म्माध्याससिद्धिरेव भेदसिद्धिः । विप्रतिपन्नं प्रति तु विरुद्धधर्म्माध्यासाद्भेदव्यवहारः साध्यते । ननु तथापि सत्त्वमिदमनैकान्तिकमेवासाधारणत्वात् [१३] सन्दिग्धव्यतिरेकत्वाद्वा । यथा हीदं क्रमाक्रमनिवृत्तौ अक्षणिकान्निवृत्तं, तथा सापेक्षत्वानापेक्षत्वयोरेकत्वानेकत्वयोरपि व्यापकयोर्निवृत्तौ क्षणिकादपि । तथाह्युपसर्पणप्रत्ययेन देवदत्तकरपल्लवादिना सहचरो बीजक्षणः पूर्व्वस्मादेव पुञ्जात् समर्थो जातोऽनपेक्ष आद्यातिशयस्य जनक इष्यते । तच्च[1] समानकुशूलजन्मसु बहुषु बीजसन्तानेषु कस्मात्

[1] A omits च ।

किञ्चिदेव वीजं परम्परयाङ्कुरोत्पादानुगुणमुपजनयति वीजक्षणन्नान्ये वीजक्षणा भिन्नसन्तानान्तःपातिनः । नह्युपसर्पणप्रत्ययात् प्रागेव तेषां समानासमान सन्तानवर्त्तिनां वीजक्षणानां कश्चित् परम्परातिशयः । अथोपसर्पणात्[1] प्राङ्न तत् सन्तान[2]वर्त्तिनोऽपि जनयन्ति परम्परयाप्यङ्कुरोत्पादानुगुणं वीजक्षणं वीजमाचजननात्तेषां । कस्यचिदेव वीजक्षणस्योपसर्पणप्रत्ययसहभुव आद्यातिशयोत्पादः । हन्त तर्हि यदभावे सत्युत्पन्नोपि न जनयेदेव । तथा[3] केवलानां व्यभिचारसम्भवादाद्यातिशयोत्पादमङ्कुरं वा प्रति क्षित्यादीनां परस्परापेक्षाणामेवोत्पादकत्वमकामकेनापि स्वीकर्त्तव्यं । अतो न तावदनपेक्षा क्षणिकस्य सम्भविनी । नाप्यपेक्षा युज्यते । समसमयक्षणयोः सव्येतरगोविषाणयोरिवोपकार्य्योपकारकभावायोगादिति नासिद्धः प्रथमो व्यापकाभावः । अपि चान्त्यो वीजक्षणोऽनपेक्षोऽङ्कुरादिकं कुर्व्वन् यदि येनैव रूपेणाङ्कुरं करोति तेनैव क्षित्यादिकं । तदा क्षित्यादीनामपि अङ्कुरस्वाभाव्यापत्तिरभिन्नकारणत्वादिति न तावदेकत्वसम्भवः ।

---

१ A उपसर्पच प्रत्ययात् । २ A सन्तानानुवर्त्तिनः ।
३ A तथा च ।

ननु रूपान्तरेण करोति । तथा हि वीजस्याङ्कुरं प्रत्युपादानत्वं क्षित्यादिकं तु प्रति सहकारित्वं । यद्येवं सहकारित्वोपादानत्वे किमेकन्तत्वं नाना वा । एकश्चेत कथं रूपान्तरेण जनकं । नानात्वे त्वनयोर्वीजाङ्गेदोऽभेदो वा । भेदे कथं वीजस्य जनकत्वं ताभ्यामेवाङ्कुरादीनामुत्पत्तेः । अभेदे वा कथं वीजस्य न नानात्वं भिन्नतादात्म्यात् । एतयोर्वा एकत्वमेकतादात्म्यात् । यद्युच्येत । क्षित्यादौ जनयितव्ये तदुपादानम् पूर्व्वमेव क्षित्यादिवीजस्य रूपान्तरमिति । न तर्हि वीजन्तदनपेक्षं क्षित्यादीनां जनकं । तदनपेक्षत्वे तेषामङ्कुरोङ्गेदानुपपत्तेः । न चानुपकारकाण्यपेक्षन्त इति त्वयैवोक्तं । न च क्षणस्योपकारसम्भवोऽन्यच्च जननात् तस्याभेद्यत्वादित्यनेकत्वमपि नास्तीति द्वितीयोऽपि व्यापकाभावो न सिद्धः । तस्मादसाधारणानैकान्तिकत्वं गन्धवत्त्ववदिति । यदि मन्येतानुपकारका अपि भवन्ति सहकारिणोऽपेक्षणीयाश्च कार्य्येणानुविहितभावाभावात् सहकरणाच्च । नन्वनेन क्रमेण[१४]क्षणिकोपि भावोऽनुपकारकानपि सहकारिणः क्रमवतः क्रमवत्कार्य्येणानुकृतान्वयव्यतिरेकानपेक्षिष्यते । करिष्यते च क्रमवत् सहकारिवशः क्रमेण कार्य्याणीति व्यापकानुपलब्धे-

रसिद्धेः। सन्दिग्धव्यतिरेकमनैकान्तिकं सत्त्वं क्षणिकत्व-सिद्धाविति॥

अत्र ब्रूमः। कीदृशं पुनरपेक्षार्थमादाय क्षणिके[1] सापेक्षानपेक्षत्वनिवृत्तिरुच्यते। किं सहकारिणमपेक्षत इति सहकारिणास्योपकारः कर्त्तव्यः।

अथ पूर्व्वावस्थितस्यैव वीजादेः सहकारिणा सह सम्भूयकरणं। यद्वा पूर्व्वावस्थितस्येत्यनपेक्षमिलितावस्थस्य करणमात्रमपेक्षार्थः। अत्र प्रथमपक्षस्यासम्भवा[2]-दनपेक्षैव क्षणिकस्य कथमुभयव्यावृत्तिः। यद्यनपेक्षः क्षणिकः, किमित्युपसर्पणप्रत्ययाभावेऽपि न करोति। करोत्येव यदि स्यात्। स्वयमसम्भवी तु कथं करोतु। अथ तद्वा तादृग्वा आसीदिति न कश्चिद्विशेषः। तत-स्तादृक्स्वभावसम्भ[3]वेष्यकरणं सहकारिणि निरपेक्षतां न क्षमत इति चेत्। असम्बद्धमेतत्[4]। वर्णसंस्थान-साम्येष्यकर्त्तुस्तत्स्वभावताया विरहात्। स चाद्यातिशय-जनकत्वलक्षणः स्वभावविशेषो न समानासमान-सन्तानवर्त्तिषु वीजक्षणेषु सर्व्वेष्वेव[5] सम्भवी किन्तु केषुचिदेव कर्म्मकरकर[6]पल्लवसहचरेषु। नन्वेकत्र क्षेत्रे

---

१ A क्षणिकत्वे। २ A असद्भावात्। ३ A omits ॰सम्भवे।
४ A असम्बद्धमेतत्। ५ A omits सर्व्वेषु। ६ B omits ॰कर॰।

निष्पत्तिलबनादिपूर्व्वकमानौयैकत्र कुशूले श्लिष्टानि सर्व्वाण्येव वीजानि साधारणरूपाण्येव प्रतीयन्ते, तत् कुतस्त्योऽयमेक[1] वीजसम्भवो विशेषोन्येषा[2]मिति चेत्।

उच्यते। कारणं खलु सर्व्वत्र कार्य्ये द्विविधं। दृष्टमदृष्टञ्च सर्व्वास्तिकप्रसिद्धमेतत्। ततः प्रत्यक्षपरोक्षसहकारिप्रत्यय[3]साकल्यमसर्व्वविदा प्रत्यक्षतो न शक्यं प्रतिपत्तुं। ततो भवेदपि कारणसामग्रीशक्तिभेदात्तादृशः स्वभावभेदः केषाञ्चिदेव वीजक्षणानां येन तएव वीजक्षणा[4] आद्यातिशयमङ्कुरम्बा परम्परया जनयेयु र्नान्ये वीजक्षणाः। ननु येषूपसर्पणप्रत्ययसहचरेषु स्वकारणशक्तिभेदादाद्यातिशयजनकत्वलक्षणो विशेषः सम्भाव्यते, स तत्रावश्यमस्तीति कुतो लभ्यमिति चेत्। अङ्कुरोत्पादादनुमितादाद्यातिशयलक्षणात् कार्य्यादिति ब्रूमः। कारणानुपलब्धेस्तर्हि तदभाव एव भविष्यतीति चेत्। न। दृश्यादृश्यसमुदायस्य कारणस्यादर्शनेप्यभावसिद्धेः कारणानुपलब्धेः सन्दिग्धासिद्धत्वात्। तदयमर्थः॥ पाणिस्पर्शवतः क्षणस्य न भेदभिन्नान्यकालक्षणाद्भेदो वेति मतद्वये मितिबलं यस्यास्त्यसौ जित्वरः। तत्रैकस्य

---

१ A कतिपय०। २ A वीजक्षणानाम्।
३ A omits प्रत्यय०। ४ क्षणाः।

बलं निमित्तविरहः कार्य्याङ्गमन्यस्य वा । सामग्री तु न सर्व्वथेक्षणसहा कार्य्यन्तु मानानुगममिति ॥

तदेवं नोपकारोऽपेक्षार्थ इत्यनपे[१५]क्ष्यैव क्षणिकस्य सहकारिषु नोभयव्यावृत्तिः । अथ सम्भूयकरणमपेक्षार्थः । तदा यदि पूर्व्वस्थितस्येति विशेषणापेक्षा तदा क्षणिकस्य नैवं कदाचिदित्यनपेक्षैवाक्षीणा । अथ पूर्व्वस्थितस्येत्यनपेक्ष्यमिलितावस्थितस्यैव[१] करणमपेक्षार्थस्तदा सापेक्षतैव नानपेक्षा । तथा च नोभयव्यावृत्तिरित्यसिद्धः प्रथमो व्यापकानुपलम्भः । तथैकत्वानेकत्वयोरपि व्यापकयोः क्षणिकाद्यावृत्तिरसिद्धा । तत्तद्व्यावृत्तिभेदमाश्रित्योपादानत्वादिकाल्पनिकस्वभावभेदेऽपि परमार्थत एकेनैव स्वरूपेणानेककार्य्यनिष्पादनादुभयव्यावृत्तेरभावात् । यच्च वीजस्यैकेनैव[२] स्वभावेन कारकत्वे क्षित्यादीनामङ्कुरस्वाभाव्यापत्तिरन्यथा कारणाभेदेऽपि कार्य्यभेदेऽपि[३] कार्य्यस्याहेतुकत्वप्रसङ्गादित्युक्तं तदसङ्गतं । कारणैकत्वस्य कार्य्यभेदस्य च पटुनेन्द्रियप्रत्यक्षेण प्रसाधनात्[४] । एककारणजन्यत्वैकत्वयोर्व्याप्तेः प्रतिहतत्वात् । प्रसङ्गस्यानुपदत्वात् । यच्च कारणाभेदे

---

१ मिलितावस्थस्यैव ।
२ A omits एव ।
३ A omits अपि ।
४ A साधनात् ।

कार्य्याभेद इत्युक्तं तच्च सामग्रीस्वरूपं कारणमभिप्रेतं सामग्रीसजातीयत्वे न कार्य्यविजातीयतेत्यर्थः । न पुनः सामग्रीमध्यगतेनैकेनानेकं कार्य्यं[१] न कर्त्तव्यं नाम । एकस्मादनेकोत्पत्तेः प्रत्यक्षसिद्धत्वात् । न चैवं प्रत्यभिज्ञानात् कालभेदेप्यभेदसिद्धिरित्युक्तप्रायम् । न चेन्द्रियप्रत्यक्षं भिन्नदेशं सप्रतिघं दृश्यमर्थद्वयमेकमेवोपलभ्यतीति क्वचिदुपलब्धं येन तत्रापि भेदशङ्का स्यात् । शङ्कायाम्वा पटुप्रत्यक्षस्याप्यपलापे सर्व्वप्रमाणोच्छेदप्रसङ्गात्[२] । नापि सन्दिग्धव्यतिरेकः[३] । क्षित्यादेर्द्रव्यान्तरस्य बीजस्वभावत्वेनास्माभिरस्वीकृतत्वात् अनुपकारिण्यपेक्षायाः प्रत्याख्यानात् । व्यापकानुपलम्भस्यासिद्धत्वायोगात् । तदेतौ द्वावपि व्यापकानुपलम्भावसिद्धौ न क्षणिकात् सत्त्वन्निवर्त्तत[४] इति नायमसाधारणो हेतुः । अपि च विद्यमानो भावः साध्येतरयोरनिश्चितान्वयव्यतिरेको गन्धवत्तादिवदसाधारणो युक्तः । प्रकृतव्यापकानुपलम्भाच्च सर्व्वथार्थक्रियैवासती उभाभ्याम्वादिभ्यामुभयस्माद्विनिवर्त्तितत्वेन निराश्रयत्वात् । तत् कथमसाधारणानैकान्तिकी भविष्यत्यलं[५] प्रलापिनि

१ A omits न ।
२ A adds इति ।
३ A नापि सत्तेहेतोः सन्दिग्धव्यतिरेकत्वम् ।
४ A निवर्त्तयते ।
५ A adds वत ।

निर्ब्बन्धेन । तदेवं शक्तस्य क्षेपायोगात् समर्थव्यवहार-गोचरत्वं जननेज व्याप्तमिति प्रसङ्गविपर्य्ययोः सत्त्वे हेतोरपि नानैकान्तिकत्वमतः क्षणभङ्गसिद्धिरिति स्थितम् ॥

इति साधर्म्यदृष्टान्तेऽन्वयरूपव्याख्या
क्षणभङ्गसिद्धिः समाप्ता ॥

कृतिरियं महापण्डितरत्नकीर्त्तिपादानामिति[1] ॥

---

१ A has the following post-colophon statement ग्रन्थप्रमाणम् । २५०। अभिदुष्टाक त्रिलोचनदत्तेन प्रकरणमिदं लिखितमात्मार्थं परार्थञ्चेति ।

# क्षणभङ्गसिद्धिः व्यतिरेकात्मिका ।

[1]व्यतिरेकात्मिका व्याप्तिरा[१६]श्लिष्टान्वयरूपिणी ।
वैधर्म्यवति दृष्टान्ते सत्त्वे हेतोरिहोच्यते ॥

यत्सत्तत् क्षणिकं यथा घटः सन्तश्चामीविवादास्पदीभूताः पदार्था इति स्वभावो हेतुः । न तावदस्यासिद्धिः सम्भवति । यथायोगं प्रत्यक्षानुमाणप्रमाणप्रतीते धर्म्मिणि सत्त्वशब्देनाभिप्रेतस्यार्थक्रियाकारित्वलक्षणस्य साधनस्य प्रमाणसमधिगतत्वात् । न च विरुद्धानैकान्तिकते । व्यापकानुपलम्भात्मना विपर्य्ययबाधकप्रमाणेन व्याप्तेः प्रसाधनात् । व्यापकञ्चार्थक्रियाकारित्वस्य क्रमाक्रमिकार्य्यविषयत्वमेव । न पुनः कारणगतौ कार्य्यगतौ वा क्रमाक्रमावस्य व्यापकौ । ह्यत्वा कारणलक्षणस्य क्रमस्य क्षणिकेऽसम्भवात् । कार्य्यगताभ्यां क्रमाक्रमाभ्यां कारणशक्तेर्व्याप्त्ययोगात् । तस्मात् कारणगतया क्रमाक्रमिकार्य्यविषयतया व्याप्यमाना कारणशक्तिः क्रमाक्रमव्याप्तेत्युच्यते । विषयेण विषयिनिर्देशात् । व्यवहारलाघवार्थं । ततश्च यद्यपि सर्व्वत्र क्रमाक्रमौ

१ A has an invocation here नमो लोकेश्वरायासु ।

सत्त्वस्य[1] व्यापकावित्याद्युच्यते। तथापि क्रमाक्रमिकार्य्यविषयत्वमेव, व्यापकं बोद्धव्यं। ननु यदैकमेव कार्य्यमङ्कुरादिकमुत्पद्यते, तदा कथं कार्य्यगतक्रमाक्रमव्यवस्थेति चेत्।

उच्यते। यद्यप्येकमेव कार्य्यं भिन्नकालकार्य्यमपेक्ष्य क्रमस्तदभावाच्चाक्रम स्तत्कारित्वमेव क्रमाक्रमकारित्वं। तथाप्यपेक्षणीयविषयभेदात् क्रमाक्रमयोरसाङ्कर्य्यमेव। पितृपुत्रत्ववत्। कः पुनरसौ व्याप्तिप्रसाधको व्यापकानुपलम्भ इति चेत्। उच्यते। यस्य क्रमाक्रमिकार्य्यविषयत्वन्नास्ति, न तत् शक्तं, यथा शशविषाणं। नास्ति च नित्याभिमतस्य भावस्य क्रमाक्रमिकार्य्यविषयत्वमिति व्यापकानुपलम्भः। न तावदयमसिद्धो वक्तव्यः। नित्यस्य धर्म्मिणः क्रमाक्रमिकार्य्यविषयत्वेन व्यापकेन सह विरोधसद्भावात्, तथा हि पूर्व्वापरकालयोरेकत्वे नित्यत्वं क्षणद्वयेपि भेदे क्रमाक्रमित्वं। ततश्च नित्यत्वं क्रमाक्रमित्वञ्चेत्यभिन्नत्वं भिन्नत्वञ्चेत्युक्तं भवति। एतयोश्च परस्परपरिहारस्थितिलक्षणतया विरोधः। तत् कथं नित्ये क्रमाक्रमसम्भवः। नापि विरुद्धः सपक्षे भावात्। नचानैकान्तिकः। क्रमाक्रमा-

१ A सत्त्वे।

भावस्यार्थक्रियासामर्थ्याभावेन व्याप्तत्वात् । तथा हि न तावत् क्रमाक्रमाभ्यामन्यः प्रकारोस्ति, येनार्थक्रिया-सम्भावनायां क्रमाक्रमाभ्यामर्थक्रियाव्याप्तिर्न स्यात् । तस्मादर्थक्रियामात्रानुबद्धतया तयोरन्यतरप्रकारस्य । उभयोरभावे चाभावादर्थक्रियामात्रस्येति ताभ्यां तस्य व्याप्तिसिद्धिः । पक्षीकृते च तयोरभावेनार्थक्रियाशक्त्य-भावसिद्धौ कथमनेकान्तः । न हि व्याप्यव्यापकयो-र्व्याप्यव्यापकभावसिद्धिमुद्भूय[१७]व्याप्याभावेन व्याप-काभावस्य व्याप्तिसिद्धौ, उपायान्तरमस्तीति निरवद्यो-व्यापकानुपलम्भः । सत्त्वस्य क्षणिकत्वेन व्याप्तिं साधय-त्येव[१] । ननु व्यापकानुपलम्भतः सत्त्वस्य कथं स्वसाध्य-प्रतिबन्धसिद्धिः, अस्याप्यनेकदोषदुष्टत्वात् । तथाहि न तावदयं प्रसङ्गो हेतुः साध्यधर्म्मिणि प्रमाणसिद्ध-त्वात्, पराभ्युपगमसिद्धत्वाभावात्, विपर्य्ययपर्य्यवसाना-भावाच्च । अथ स्वतन्त्रः, तदाश्रयासिद्धः । अक्षणि-कस्याश्रयस्यासम्भवादप्रतीतत्वाद्वा । प्रतीतिर्हि प्रत्य-क्षेणानुमानेन विकल्पमात्रेण वा स्यात् । प्रथमपक्षद्वये साक्षात्पारम्पर्य्येण वा स्वप्रतीतिलक्षणार्थकारित्वे मौलः साधारणो हेतुः । व्यापकानुपलम्भश्च स्वरूपासिद्धः

१ A प्रसाधयत्येव ।

स्यात्। अर्थक्रियाकारित्वे क्रमाक्रमयोरन्यतरस्यावश्यभावात्। अन्तिमपक्षे तु न कश्चिद्धेतुरनाश्रयः स्यात् विकल्पमात्रसिद्धस्य धर्म्मिणः सर्व्वत्र सुलभत्वात्। अपि च तत् कल्पनाज्ञानं प्रत्यक्षपृष्ठभावि वा स्यात्, लिङ्गजन्म वा, संस्कारजं वा, सन्दिग्धवस्तुकं वा, अवस्तुकं वा। तत्राद्यपक्षद्वये ऽक्षणिकस्य सत्तैवाव्याहता कथं वाधकावतारः। तृतीये तु न सर्व्वदा ऽक्षणिकसत्तानिषेधः। तदर्पितसंस्काराभावे तत् स्मरणायोगात्। चतुर्थे तु सन्दिग्धाश्रयत्वं हेतुदोषः। पञ्चमे च तद्विषयस्याभावो न तावत् प्रत्यक्षतः सिध्यति। अक्षणिकात्मनः सर्व्वदैव त्वन्मते ऽप्रत्यक्षत्वात्। न चानुमानतस्तदभावः प्रतिबद्धलिङ्गानुपलम्भादित्याश्रयासिद्धिस्तावदुद्भटा। एवं दृष्टान्तोपि प्रतिहन्तव्यः॥

'स्वरूपासिद्धोप्ययं हेतुः स्थिरस्यापि क्रमाक्रमिसहकार्य्यपेक्षया क्रमाक्रमाभ्यामर्थक्रियोपपत्तेः। नापि क्रमयौगपद्यपक्षोक्तदोषप्रसङ्गः। तथाहि क्रमिसहकार्य्यपेक्षया क्रमिकार्य्यकारित्वन्तावदविरुद्धं।

तथाच शङ्करस्य संक्षिप्तोऽयमभिप्रायः। सहकारिसाकल्यं हि सामर्थ्यं। तदैकल्यञ्चासामर्थ्यं। न च तयोराविर्भावतिरोभावाभ्यान्तदतः काचित् क्षतिः, तस्य

ताभ्यामन्यत्वात् । तत्कथं सहकारिणोऽनपेक्ष्यकार्य्यकरणप्रसङ्ग इति ॥

चिलोचनस्याप्ययं संक्षिप्तार्थः । कार्य्यमेव हि सहकारिणमपेक्षते । न कार्य्योत्पत्तिहेतुः । यस्माद्द्विविधं सामर्थ्यन्निजमागन्तुकञ्च सहकार्य्यन्तरं । ततो ऽक्षणिकस्यापि क्रमवत्सहकारिनानात्वादपि क्रमवत्कार्य्यनानात्वोपपत्तेरशक्यं भावानां प्रतिक्षणमन्यान्यत्वमुपपादयितुमिति ॥

न्यायभूषणोऽपि लपति । प्रथमकार्य्योत्पादनकाले ह्युत्तरकार्य्योत्पादनस्वभावः । अतः प्रथमकाल एवाशे[१८]षाणि कार्य्याणि कुर्य्यादिति चेत् । तदिदं माता मे वन्ध्येत्यादिवत् स्ववचनविरोधादयुक्तं । योह्युत्तरकार्य्यजननस्वभावः स कथमादौ तत्कार्य्यं कुर्य्यात् । न तर्हि तत्कार्य्यकरणस्वभावः । नहि नीलोत्पादनस्वभावः पीतादिकमपि करोतीति ॥

वाचस्पतिरपि पठति । नन्वयमक्षणिकः स्वरूपेण कार्य्यञ्जनयति । "तच्चास्य स्वरूपं तृतीयादिष्विव क्षणेषु द्वितीयेऽपि क्षणे सदिति तदापि जनयेत् । अकुर्व्वन् वा तृतीयादिष्वपि न कुर्व्वीत । तस्य तादवस्थ्यात् । अतादवस्थ्ये वा तदेवास्य क्षणिकत्वं ।

अचोच्यते । सत्यं[1] स्वरूपेण कार्य्यञ्जनयति न तु तेनैव । सहकारिसहितादेव ततः कार्य्योत्पत्तिदर्शनात् । तस्मात् व्याप्तिवत्कार्य्यकारणभावोऽप्येकचान्ययोगव्यवच्छेदेनान्यचायोगव्यवच्छेदेनावबोद्धव्यः । तथैव लोकिकपरीक्षकाणां सम्प्रतिपत्तेरिति न क्रमिकार्य्यकारित्वपक्षोक्तदोषावसरः ॥

नाप्यक्षणिके यौगपद्यपक्षोक्तदोषावकाशः । ये हि कार्य्यमुत्पादितवन्तो द्रव्यविशेषास्तेषां व्यापारस्य नियतकार्य्योत्पादनसमर्थस्य निष्पादिते कार्य्ये ऽनुवर्त्तमानेष्वपि तेषु द्रव्येषु निवृत्तार्थादूना सामग्री जायते । तत्कथं निष्पादितं निष्पादयिष्यति । न हि दण्डाद्यः स्वभावेनैव कर्त्तारो येनामी निष्पत्तेरारभ्य कार्य्यं विदध्युः । किन्तर्हि व्यापारावेशिनः । न चेयता स्वरूपेण न कर्त्तारः स्वरूपकारकत्वनिर्व्वाहपरतया व्यापारसमावेशादिति ॥

किञ्च क्रमाक्रमाभावश्च भविष्यति न च सत्वाभाव इति सन्दिग्धव्यतिरेकोप्ययं व्यापकानुपलम्भः । न हि क्रमाक्रमाभ्यामन्यप्रकारस्याभावः सिद्धः । विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वात् । किञ्च प्रकारान्तरस्य

---

१ A omits सत्यम् ।

दृश्यत्वेनात्यन्तनिषेधः । अदृश्यत्वे तु नासत्तानिश्चयो विप्रकर्षिणामिति न क्रमाक्रमाभ्यामर्थक्रियासामर्थ्यस्य व्याप्तिसिद्धिः । अतः सन्दिग्धव्यतिरेकोऽपि व्यापकानुपलम्भः । किञ्च दृश्यादृश्यसहकारिप्रत्ययसाकल्यवतः क्रमयौगपद्यस्यात्यन्तपरोक्षत्वात् तेन व्याप्तं सत्त्वमपि परोक्षमेवेति न तावत्प्रतिबन्धः प्रत्यक्षतः सिध्यति नाप्यनुमानतः, तत्प्रतिबद्धलिङ्गाभावादिति । अपि च क्रमाक्रमाभ्यामर्थक्रियाकारित्वं व्याप्तमित्यतिसुभाषितं । यदि क्रमेण व्याप्तं कथमक्रमेण । अथाक्रमेण न तर्हि क्रमेण; क्रमाक्रमाभ्यां व्याप्तमिति तु ब्रूवता व्याप्तेरेवाभावः प्रदर्शितो भवति । नहि भवति । अग्निर्धूमभावाभावाभ्यां व्याप्त इति । अतो व्याप्तेरनैकान्तिकत्वं । अपि च किमिदं बाधकमक्षणिकानामसत्तां साध [१९] यति, उतस्वित्, अक्षणिकात् सत्त्वस्य व्यतिरेकं, अथ सत्त्वक्षणिकत्वयोः प्रतिबन्धं । न पूर्वो विकल्पः । उक्तक्रमेण हेतोराश्रयासिद्धत्वात् । न च द्वितीयः । यतो व्यापकनिवृत्तिसहिता व्याप्यनिवृत्तिर्व्यतिरेकशब्दस्यार्थः । सा च यदि प्रत्यक्षेण प्रतीयते तदा तद्धेतुः स्यादिति सत्त्वमनैकान्तिकं । व्यापकानुपलम्भः स्वरूपासिद्धः । अथ सा विकल्प्यते । तदा पूर्वोक्तक्रमेण पञ्चधा विकल्प्य

विकल्पो दूषणीयः। अत एव न तृतीयोऽपि विकल्पः। व्यतिरेकासिद्धौ सम्बन्धासिद्धेः। किञ्च न भूतलवद् क्षणिको धर्म्मो दृश्यते। न च स्वभावानुपलम्भे व्यापकानुपलभ्भः कस्यचित् दृश्यस्य प्रतिपत्तिमन्तरेणान्तर्भावयितुं शक्य इति। किञ्चास्याभावधर्म्मत्वे। आश्रयासिद्धत्वमितरेतराश्रयत्वञ्च। भावधर्म्मत्वे विरुद्धत्वञ्च। उभयधर्म्मत्वे चानैकान्तिकत्वमिति न त्रयीन्दोषजातिमतिपतति॥

यत्पुनरुक्तमक्षणिकत्वे क्रमयौगपद्याभ्यामर्थक्रियाविरोधादिति। तच्च विरोधसिद्धिमनुसरता विरोध्यपि प्रतिपत्तव्यः। तत्प्रतीतिनान्तरीयकत्वात् विरोधसिद्धेः। यथा तुहिनदहनयोः सापेक्षध्रुवभावयोश्च प्रतियोगी क्षणिकः प्रतीयमानः प्रतीतिकारित्वात् सन्नेव स्यात् अजनकस्याप्रमेयत्वात्। संवृतिसिद्धेनाक्षणिकत्वेन विरोधसिद्धिरिति चेत्। संवृतिसिद्धमपि वास्तवं काल्पनिकं वा स्यात्। यदि वास्तवं कथन्तस्यासत्त्वं कथञ्चार्थक्रियाविरोधः। अर्थक्रियां कुर्व्वद्धि वास्तवमुच्यते।

अथ काल्पनिकं। तच्च किं विरोधो वास्तवः काल्पनिको वा। न तावद्वास्तवः कल्पितविरोधिविरोधत्वात्। बन्ध्यापुत्रविरोधवत्। अथ विरोधोऽपि काल्प-

निकः । न तर्हि सत्त्वस्य व्यतिरेकः पारमार्थिक इति क्षणभङ्गो दत्तजलाञ्जलिरिति । अयमेव चोद्यप्रबन्धोऽस्मद् गुरुभिः संगृहीतः ॥

नित्यन्नास्ति न वा प्रतीतिविषयस्तेनाश्रयासिद्धता । हेतोः स्वानुभवस्य चाक्षतिरतः क्षिप्तः सपक्षोऽपि च । शून्यश्च द्वितीयेन सिध्यति न चासत्तापि सत्ता यथा नो नित्येन विरोधसिद्धिरसता शक्या क्रमादेरपीति ॥

अचोच्यते । इह वस्तुन्यपि धर्म्मिधर्म्मव्यवहारो दृष्टो यथा गवि गोत्वं, पटे शुक्लत्वं तुरगे गमनमित्यादि । अवस्तुन्यपि धर्म्मिधर्म्मव्यवहारो दृष्टो यथा शशविषाणे तीक्ष्णत्वाभावो वन्ध्यापुत्रे वक्रत्वाभावो गगणारविन्दे गन्धाभाव इत्यादि । तचावस्तुनि धर्म्मित्वन्नास्तीति किम्वस्तुधर्म्मेण धर्म्मित्वन्नास्ति । आहोस्विदवस्तुधर्म्मेणापि । प्रथमपक्षे सिद्धसाधनं द्वितीयपक्षे तु स्ववचनविरोधः । यदाहु गुरवः ।

धर्म्मस्य कस्यचिद [२०] वस्तुनि मानसिद्धा
बाधाविधिव्यवहृतिः किमिहास्ति नो वा ।
क्वाप्यस्ति चेत् कथमियन्ति न दूषणानि
नास्त्येव चेत् स्ववचनप्रतिरोधसिद्धिः ॥

अवस्तुनो धर्म्मित्वस्वीकारपूर्व्वकत्वस्य व्यापकस्याभावे

आश्रयासिद्धिदूषणस्यानुपन्यासप्रसङ्ग इत्यर्थः। येनैव हि वचनेनावस्तुनो[१] धर्म्मित्वाभावेन धर्म्मेण धर्म्मित्वमभ्युपगतं। परस्तु प्रतिषिध्यत इति व्यक्तमिदमीश्वरचेष्टितं। तथाह्यवस्तुनो धर्म्मित्वन्नास्तीति वचनेन धर्म्मित्वाभावः किमवस्तु विधीयते, अन्यच्च वा, न वा क्वचिदपीति त्रयः पक्षाः।

प्रथमपक्षेऽवस्तुनो न धर्म्मित्वनिषेधः। धर्म्मित्वाभावस्य धर्म्मस्य तत्रैव विधानात्। द्वितीयेऽवस्तुनि किमायातं। अन्यच्च धर्म्मित्वाभावविधानात्। तृतीयस्तु पक्षो व्यर्थ एव निराश्रयत्वात् इति कथमवस्तुनो धर्म्मित्वनिषेधः। तस्माद्यथा प्रमाणोपन्यासः प्रमेयस्वीकारपूर्व्वकत्वेन व्याप्तः। वाचकशब्दोपन्यासो वा वाच्यस्वीकारपूर्व्वकत्वेन व्याप्तः। तथाऽवस्तुनो धर्म्मित्वं नास्तीति वचनोपन्यासोऽवस्तुनो धर्म्मित्वस्वीकारपूर्व्वत्वेन व्याप्तः। अन्यथा तद्वचनोपन्यासस्य व्यर्थत्वात्। तद्यदि वचनोपन्यासो व्याप्यधर्म्मः। तदाऽवस्तुनो धर्म्मित्वस्वी-

---

१ A adds धर्म्मित्वं प्र × × × × × नो। A has lost about ten letters. The reading of B is evidently wrong. The sentence may be thus emended :—

येनैव हि वचनेनावस्तुनो धर्म्मित्वं प्राप्तं तेनैव वचनेनावस्तुनो धर्म्मित्वाभावेन धर्म्मेना वस्तुनो धर्म्मित्वमभ्युपगतम्।

कारोपि व्यापकधर्म्मो दुर्व्वारः । अथ न व्यापकधर्म्मः । तदा व्याप्यस्यापि वचनोपन्यासस्यासम्भव इति मूकतैवाच बलादायातेति कथं न स्ववचनविरोध[1]सिद्धिः । नह्यब्रुवन् परम्बोधयितुमीशः । ब्रुवन् वा दोषमिमं परिहर्त्तुमिति महति सङ्कटे प्रवेशः । अवस्तुप्रस्तावे सहृदयाणां मूकतैव युज्यत इति चेत् । अहो महद्वैदग्ध्यं । अवस्तुप्रस्तावे स्वयमेव यथाशक्ति वल्गित्वा भग्नो मूकतैव न्यायप्राप्तेति परिभाषया निःसर्त्तुमिच्छति । नचावस्तुप्रस्तावो राजदण्डेन विना चरणमर्द्दनादिनानिष्टिमात्रेण वा प्रतिषेद्धुं शक्यते[2] । ततश्चाचापि क्रमाक्रमाभावस्य साधनत्वे[3] सत्त्वाभावस्य च साध्यत्वे सन्दिग्धवस्तुभावस्यावस्त्वात्मनो वा क्षणिकस्य धर्म्मित्वं केन प्रतिहन्यते । त्रिविधो हि धर्म्मो दृष्टः कश्चिद्वस्तुनियतो नीलादिः । कश्चिदवस्तुनियतो यथा सर्व्वोपाख्याविरहः । कश्चिदुभयसाधारणो यथानुपलब्धिमात्रं । तच्च वस्तुधर्म्मेणावस्तुनो धर्म्मित्वनिषेध इति युक्तं । नत्ववस्तुधर्म्मेण । वस्त्ववस्तुधर्म्मेण वा । स्ववचनस्यानुपन्यासप्रसङ्गादित्यक्षणिकस्याभावे सन्देहे[4] वाऽवस्तु-

---

१ A प्रतिरोध° ।
२ A शक्यः ।
३ B साधनत्वेन ।
४ A adds अपि ।

धर्म्मेण धर्म्मित्वमव्याहतमिति नायमाश्रयासिद्धो व्यापकानुपलम्भः ॥

अक्षणिकाप्रतीता वयमाश्रयासिद्धोहेतुरिति तु युक्तमुक्तं[1]। तदप्रतीतौ तद्व्यवहारायोगात्। केवलमसौ व्यवहाराङ्गभूता प्रतीति र्वस्त्ववस्तुनोरेकरूपा न भवति। साक्षात्पारम्पर्य्येण वस्तुसामर्थ्यभाविनी हि वस्तु(२१)-प्रतीतिः। यथा प्रत्यक्षमनुमानं प्रत्यक्षपृष्ठभावी च विकल्पः। अवस्तुनस्तु सामर्थ्याभावात् विकल्पमात्रमेव प्रतीतिः। वस्तुनो हि वस्तुबलभाविनी प्रतीति| र्यथा-साक्षात्प्रत्यक्षं परम्परया तत्पृष्ठभावी विकल्पोऽनुमानञ्च। अवस्तुनस्तु न वस्तुबलभाविनी प्रतीतिस्तत्कारकत्वेनावस्तुत्वहानिप्रसङ्गात्। तस्माद्विकल्पमात्रमेवावस्तुनः प्रतीतिः। नह्यभावः कश्चिद्ग्रहवान् यः साक्षात्कर्त्तव्योऽपि तु व्यवहर्त्तव्यः। स च व्यवहारो विकल्पादपि सिध्यत्येव। अन्यथा सर्व्वजनप्रसिद्धोऽवस्तुव्यवहारो न स्यात्। इष्यते च तद्धर्मित्वप्रतिषेधानुवन्धादित्यकामकेनापि विकल्पमात्रसिद्धोऽक्षणिकः स्वीकर्त्तव्य इति नायमप्रतीतत्वाद्व्याश्रयासिद्धोहेतुर्वक्तव्यः। ततश्चाक्षणिकस्य विकल्पमात्रसिद्धत्वे यदुक्तं न कश्चिद्वे-

---

१ A has वा।

तुरनाश्रयः स्याद्विकल्पमात्रसिद्धस्य धर्म्मिणः सर्व्वत्र सुलभत्वादिति तदसङ्गतं । विकल्पमात्रसिद्धस्य धर्म्मिणः सर्व्वत्र सम्भवेऽपि वस्तुधर्म्मेण धर्म्मित्वायोगात् । वस्तुधर्म्महेतुत्वापेक्षया आश्रयासिद्धस्यापि हेतोः सम्भवात् । यथा आत्मनो विभुत्वसाधनार्थमुपन्यस्तं सर्व्वत्रोपलभ्यमानगुणत्वादिति साधनं । विकल्पश्चायं हेतूपन्यासात् । पूर्व्वं सन्दिग्धवस्तुकः, समर्थिते तु हेताववस्तुक इति ब्रूमः । न चाच सन्दिग्धाश्रयत्वं नाम हेतुदोषः । आस्तान्तावत् । सन्दिग्धस्यावस्तुनोपि विकल्पमात्रसिद्धस्यावस्तुधर्म्मापेक्षया धर्म्मित्वप्रसाधनात् । वस्तुधर्म्महेतुत्वापेक्षयैव सन्दिग्धाश्रयस्य हेत्वाभासस्य व्यवस्थापनात् । यथेह निकुञ्जे मयूरः केकायितादिति । अवस्तुकविकल्पविषयस्यासत्त्वन्तु व्यापकानुपलम्भादेव प्रसाधितं । एवं दृष्टान्तस्यापि व्योमादेर्द्धर्म्मित्वं विकल्पमात्रेण प्रतीतिश्चावगन्तव्या । तदेवमवस्तुधर्म्मापेक्षयाऽवस्तुनोधर्म्मित्वस्य विकल्पमात्रेण प्रतीतेश्चापह्नोतुमशक्यत्वान्नायमाश्रयासिद्धो हेतुः । न दृष्टान्तक्षतिः ॥

न चैष स्वरूपासिद्धः । अक्षणिके धर्म्मिणि क्रमाक्रमयो र्व्यापकयोरयोगात् । तथा हि यदि तस्य प्रथमे क्षणे द्वितीयादिक्षणभाविकार्य्यकारणसामर्थ्यमस्ति तदा

प्रथमक्षणभाविकार्य्यवत् द्वितीयादिक्षणभाव्यपि कार्य्यं कुर्य्यात्। समर्थस्य क्षेपायोगात्। अथ तदा सहकारिसाकल्यलक्षणसामर्थ्यं नास्ति। तद्वैकल्यलक्षणस्यासामर्थ्यस्य सम्भवात्। न हि भावः स्वरूपेण करोतीति स्वरूपेणैव करोति। सहकारिसहितादेव ततः कार्य्योत्पत्तिदर्शनात् इति चेत्। यदा तावदमी मीलिताः सन्तः कार्य्यं कुर्व्वते तदैकार्थकरणलक्षणं सहकारित्वमेषामस्तु को नि (२२) षेद्धा। मिलितैरेव तु तत्कार्य्यङ्कर्त्तव्यमिति कुतो लभ्यते। पूर्व्वापरकालयोरेकस्वभावत्वात् भावस्य। सर्व्वदा जननाजननयोरन्यतरनियमप्रसङ्गस्य दुर्व्वारत्वात्। तस्मात् सामग्रीजनिका नैकं जनकमिति स्थिरवादिनाम्मनोराज्यस्याप्यविषयः।

किं कुम्मों दृश्यते तावदेवमिति चेत्। दृश्यतां किन्तु पूर्व्वस्थितादेव पश्चात् सामग्रीमध्यप्रविष्टाद्भावात् कार्य्योत्पत्तिरन्यस्मादेव विशिष्टसामग्रीसमुत्पन्नात् क्षणादिति विवादपदमेतत्। तच्च प्रागपि सम्भवे सर्व्वदैव कार्य्योत्पत्ते र्नवा कदाचिदपीति विरोधमसमाधाय तत एव कार्य्योत्पत्तिरिति साध्यानुवादमात्रप्रवृत्तः कृपामर्हति।

न च प्रत्यभिज्ञानादेवैकत्वसिद्धिः। तत् पौरुषस्य लूनपुनर्ज्जातकेशकुशकदलीस्तम्बादौ निर्दलनात्। विस्तरेण

च प्रत्यभिज्ञानदूषणमस्माभिः स्थिरसिद्धिदूषणे प्रतिपादितमिति तत एवावधार्य्यं ।

ननु कार्य्यमेव सहकारिणमपेक्षते । न तु कार्य्योत्पत्तिहेतुः । यस्माद्द्विविधं सामर्थ्यं निजमागन्तुकञ्च सहकार्य्यन्तरं । ततोऽक्षणिकस्यापि क्रमवत् सहकारिनानात्वादपि क्रमवत्कार्य्यनानात्वमिति चेत्, भवतु तावन्निजागन्तुकभेदेन द्विविधं सामर्थ्यं । तथापि तत्प्रातिस्विकं वस्तुस्वलक्षणं सद्यः क्रियाधर्म्मकमवश्याभ्युपगन्तव्यम् । तद्यदि प्रागपि, प्रागपि कार्य्यप्रसङ्गः । अथ पश्चादेव न तदा स्थिरोभावः ।

न च कार्य्यं सहकारिणोऽपेक्षत इति युक्तं । तस्यासत्त्वात् । हेतुश्च सन्नपि यदि स्वकार्य्यन्नकरोति तदा तत्कार्य्यमेव तन्न स्यात्, स्वातन्त्र्यात् । यच्चोक्तं । योऽद्युत्तरकार्य्यजननस्वभावः स कथमादौ कार्य्यं कुर्य्यात् । न तर्हि तत्कार्य्यकरणस्वभावः । न हि नीलोत्पादनस्वभावः पीतादिकमपि करोतीति । तदसङ्गतं । स्थिरस्वभावत्वे भावस्योत्तरकालमेवेदं कार्य्यन्नपूर्व्वकालमिति कुत एतत् । तदभावाच्च कारणमप्युत्तरकार्य्यकरणस्वभावमित्यपि कुतः । किं कुर्म्म उत्तरकालमेव तस्य जन्मेति चेत् । स्थिरत्वे तदनुपपद्यमानमस्थिरतामादि-

शतु। स्थिरत्वेऽप्येष एव स्वभावस्तस्य यदुत्तरक्षण एव कार्य्यं करोतीति चेत्। न। प्रमाणबाधिते स्वभावाभ्युपगमायोगादिति न तावदक्षणिकस्य क्रमिकार्य्यकारित्वमस्ति। नाप्यक्रमिकार्य्यकारित्वसम्भवः। द्वितीयेऽपि क्षणे कारकस्वरूपसद्भावे पुनरपि कार्य्यकरणप्रसङ्गात्। कार्य्ये निष्पन्ने तद्विषयव्यापाराभावादूना सामग्री न निष्पादितं निष्पादयेदिति चेत्। न। सामग्रीसम्भवासम्भवयोरपि सद्यः क्रियाकारकस्वरूपसम्भवे जनकत्वमवार्य्यमिति प्रागेव प्रतिपादनात्। कार्य्यस्य हि निष्पादितत्वात् पुनः कर्त्तुमशक्यत्वमे(२३)व कारणमसमर्थमावेदयति। तदयमक्षणिके क्रमाक्रमिकार्य्यकारित्वाभावो न सिद्धः। न च क्रमाक्रमाभ्यामपरप्रकारसम्भवो येन ताभ्यामव्याप्तौ सन्दिग्धव्यतिरेको हेतुः स्यात्। प्रकारान्तरशङ्कायां तस्यापि दृश्यादृश्यत्वप्रकारद्वयदूषणेऽपि स्वपक्षेष्यनाश्वासप्रसङ्गात्। तस्मादन्योऽन्यव्यवच्छेदस्थितयोर्नापरः प्रकारः सम्भवति। स्वरूपाप्रविष्टस्य वस्तुनोऽवस्तुनोवाऽन्यत्वात्। प्रकारान्तरस्यापि क्रमस्वरूपाप्रविष्टत्वात्। तथातीन्द्रियस्य सहकारिणोऽदृश्यत्वेष्ययोगव्यवच्छेदेन दृश्यसहकारिसहितस्य दृश्यस्यैव सत्त्वस्य दृश्यक्रमाक्रमाभ्यां व्याप्तिः

प्रत्यक्षादेव सिध्यति । एवं क्रमाक्रमाभ्यामर्थक्रियाकारित्वं व्याप्तमिति क्रमाक्रमयोरन्योऽन्यव्यवच्छेदेन स्थितत्वादेतत्प्रकारद्वयपरिहारेणार्थक्रियाकारित्वमन्यच्च न गतमित्यर्थः । अत एवैतयोर्विनिवृत्तौ निवर्त्तेत ।

चिलोचनस्यापि विकल्पचये प्रथमदूषणमाश्रयासिद्धिदोषपरिहारतो निरस्तं । द्वितीयश्चासङ्गतं विकल्पज्ञानेन व्यतिरेकस्य प्रतीतत्वात् । नह्यभावः कश्चित् विग्रहवान् यः साक्षात्कर्त्तव्योऽपि तु विकल्पादेव व्यवहर्त्तव्यः । न ह्यभावस्य विकल्पादन्याप्रतिपत्तिरप्रतिपत्तिर्वा सर्व्वथोभयथापि तद्व्यवहारहानिप्रसङ्गात् । एवं वैधर्म्म्यदृष्टान्तस्य हेतुव्यतिरेकस्य च विकल्पादेव प्रतीतिः । तृतीयमपि दूषणमसङ्गतं । व्यापकानुपलम्भे निर्दोषत्वस्य[1] क्षणिकत्वेन व्याप्तेरव्याहतत्वात् ।

तदयं व्यापकानुपलम्भोऽक्षणिकस्यासत्त्वं, सत्त्वस्य ततो व्यतिरेकं क्षणिकत्वेन व्याप्तिञ्च साधयत्येकव्यापारात्मकत्वात् इति स्थितं ।

ननु व्यापकानुपलब्धिरिति यद्यनुपलब्धिमाचन्तदा न तस्य साध्यबुद्धिजनकत्वमवस्तुत्वात् । न चान्योपलब्धिर्व्यापकानुपलब्धिरभिधातुं शक्या भूतलादिवत्

१ B निर्दोषे सत्त्वस्य ।

अन्यस्य कस्यचिदनुपलब्धेरिति चेत् तदसङ्गतं। धर्म्म्युपलब्धेरेवान्यचाप्यनुपलब्धितया व्यवस्थापनात्। यथा नेह शिंशपा वृक्षाभावादित्यत्र वृक्षापेक्षया केवलप्रदेशस्य धर्म्मिण उपलब्धिर्दृश्यानुपलब्धिः। शिंशपापेक्षया च केवलप्रदेशस्य धर्म्मिण उपलब्धिरेव शिंशपाभावोपलब्धिरिति स्वभावहेतुपर्य्यवसायिव्यापारो व्यापकानुपलम्भः। तथा हि[1] नित्यस्य धर्म्मिणो विकल्पबुद्ध्यध्यवसितस्य क्रमिकारित्वाक्रमिकारित्वापेक्षया केवलग्रहणमेव क्रमिकारित्वाक्रमिकारित्वानुपलम्भ अर्थक्रियापेक्षया च। केवलप्रतीतिरेवार्थक्रियावियोगप्रतीतिरिति व्यापकानुपलम्भान्तरादस्य न कश्चिद्विशेषः।

अध्यवसायापेक्षया च वाह्योऽक्षणिकोऽव(२४)स्तुनि व्यापकाभावात् व्याप्याभावसिद्धिव्यवहारः। अध्यवसायश्च समनन्तरप्रत्ययवलायाताकारविशेषयोगादृहौतेऽपि प्रवर्त्तनशक्तिर्वोद्धव्यः। ईदृशश्चाध्यवसायोऽर्थोऽस्मच्चिचाद्वैतसिद्धौ निर्व्वाहितः। स चाविसम्बादी व्यवहारः परिहर्त्तुमशक्यः; यद्व्यापकशून्यं; तद्व्याप्यशून्यमिति। एतस्यैवार्थस्यानेनापि क्रमेण प्रतिपादनात्। अयञ्च न्यायो यथा वस्तुभूते धर्म्मिणि तथाऽवस्तुभूते-

---

[1] A omits हि।

ऽपीति को विशेषः। तथाह्येकज्ञानमात्रविकल्प्य एव। यथा च, हरिणशिरसि तेनैकज्ञानसंसर्गिशृङ्गमुपलब्धं। शशशिरस्यपि तेन सहैकज्ञानसंसर्गित्वसम्भावनयैव शृङ्गं निषिध्यते। तथा नीलादावपरिनिष्ठितनित्यानित्यभावे क्रमाक्रमौ स्वधर्म्मिणा सार्द्धं एकज्ञानसंसर्गिणौ दृष्टौ नित्येऽपि यदि भवतः। नित्यग्राहिणा ज्ञानेन स्वधर्म्मिणा नित्येन सहैव गृह्येयातामिति सम्भावनया। एकज्ञानसंसर्गिद्वारकमेव प्रतिषिध्यते। कथं पुनरेतन्नित्यज्ञाने क्रमाक्रमयोरस्फुरणमिति। यावता क्रमाक्रमक्रोडीकृतमेव नित्यं विकल्पयाम इति चेत्। अतएव बाधकावतारो विपरीतरूपारोपमन्तरेण तस्य वैयर्थ्यात्। कालान्तरेणैकरूपतया नित्यत्वं। क्रमाक्रमौ च क्षणद्वये भिन्नरूपतया। ततो नित्यत्वस्य क्रमाक्रमिकार्य्यशक्तेश्च परस्परपरिहारस्थितलक्षणतया दुर्व्वारो विरोध इति कथं नित्ये क्रमाक्रमयोरन्तर्भावः। अनन्तर्भावाच्च शुद्धनित्यविकल्पेन दूरीकृतक्रमाक्रमसमारोपेण कथमुल्लेखः। ततश्च प्रतियोगिनि नित्येऽपि कल्प्यमाने, एकज्ञानसंसर्गिलक्षणप्राप्ते नित्योपलब्धिरेव नित्यविरुद्धस्यानुपलभ्यमानस्य क्रमाक्रमस्यानुपलब्धिः। ततएव वार्थक्रियाशक्तेरनुपलब्धेः। तस्मा-

द्यापकविवेकिधर्म्म्युपलब्धितया न व्यापकानुपलम्भान्तरादस्य विशेषः ।

नन्वेतद्वस्तुधर्म्मिकोपयोगिकस्त्वधिष्ठानत्वात् प्रमाणव्यवस्थाया इति चेत् । किमिदम्बस्त्वधिष्ठानत्वन्नाम । किम्परम्परयाऽपि वस्तुनः सकाशादागतत्वम्, अथ वस्तुनि केनचिदाकारेण व्यवहारकारणत्वं, वस्तुभूतधर्म्मिप्रतिवद्धत्वम्बा ।

यद्याद्यः पक्षस्तदा क्रमाक्रमस्यार्थक्रियायाश्च व्याप्तिग्रहणगोचरवस्तुप्रतिवद्धत्वमपि न क्षीणं । न च द्वितीयेऽपि पक्षे दोषः सम्भवति । क्षणभङ्गिवस्तुसाधनोपायत्वादस्य । न चान्तिमोऽपि विकल्पः कल्प्यते । तस्यैव नित्यविकल्पस्य वस्तुनो धर्म्मिभूतस्य क्रमाक्रमवद्वाह्यनित्योपादानशून्यत्वेनार्थक्रियावद्वाह्यनित्योपादानशून्यत्वप्रसाधनात् । पर्य्युदासवृत्त्या बुद्धिस्वभावभूता क्षणिकाकारे वस्तुभूते धर्म्मिणि प्रतिवद्धत्वसम्भवात् ।

अयमेव न्यायो (२५) न वक्ता बन्ध्यासुतश्चैतन्याभावादित्यादौ योज्यः । एतेन यथा दृक्षाभावादित्याद्यन्तभावयितुं शक्यो न तथायमिति चिलोचनोऽपि निरस्तः ।

न च क्रमाद्यभावस्त्वयीं दोषजातिन्नातिक्रामति। अभावधर्म्मत्वेऽप्याश्रयासिद्धिदोषपरिहारात्। यत्त्वनेन प्रमाणान्तरान्नित्यानामसत्त्वसिद्धौ क्रमादिविरहस्याभावधर्म्मता न सिध्यतीत्युक्तं। तद्बालस्यापि दुरभिधानं। नित्यो हि धर्म्मी। असत्त्वं साध्यं। क्रमिकार्य्यकारित्वाक्रमिकार्य्यकारित्वविरहो हेतुः। अस्य चाभावधर्म्मत्वन्नाम। असत्त्वलक्षणस्वसाध्याविनाभावित्वमुच्यते। तच्च क्रमाक्रमेण सत्त्वस्य व्याप्तिसिद्धौ सत्त्वस्य व्याप्यस्याभावेन क्रमाक्रमस्य व्यापकस्य विरहो व्याप्तः सिध्यतीत्यभावधर्म्मत्वं प्रागेव विध्योर्व्याप्तिसाधकात् प्रत्यक्षादनुमानात्मकाद्वा प्रमाणान्तरात् सिद्ध मिति नेतरेतराश्रयत्वदोषः।

न च सत्तायामिवासत्तायामपि तुल्यप्रसङ्गो भिन्न न्यायत्वात्। वस्तुभूतं हि तच्च साध्यं साधनञ्च। तयोर्धर्म्ययपि वस्तुभूत एव युज्यते॥

वस्तुनस्तु प्रत्यक्षानुमानाभ्यामेव सिद्धिः। तयोरभावे नियमेनाश्रयासिद्धिरिति युक्तं। असत्तासाधने त्ववस्तुधर्म्मो हेतुरवस्तुनि विकल्पमात्रसिद्धे धर्म्मिणि नाश्रयासिद्धिदोषेण दूषयितुं शक्यः। तथाऽक्षणिकस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधः सिध्यत्येव।

तथा विकल्पादेवाक्षणिको विरोधी सिद्धः। विकल्पोल्लिखितश्चास्य स्वभावो नापर इत्यपि व्यवहर्त्तव्यं। अन्यथा तदनुवादेन क्रमाक्रमादिरहितत्वादिनिषेधादिकमयुक्तं। तत् स्वरूपस्यानुल्लेखादित्यक्षणिकशशविषाणादिशब्दानुच्चारणप्रसङ्गः। अस्ति च। अतो यथा प्रमाणाभावेऽपि विकल्पसत्वस्य बन्ध्यासुतादेःसौन्दर्य्यादिनिषेधोऽनुरूपः, तथा विकल्पोपनीतस्यैवाक्षणिकस्वरूपस्य तत् प्रत्यनीकाकारेण सह विरोधव्यवस्थायां कीदृशो दोषः स्यात्। यदि चाक्षणिकानुभवाभावात् विरोधप्रतिषेधः, तर्हि बन्ध्यापुत्राद्यननुभवादेव सौन्दर्य्यादिनिषेधोऽपि माभूत।

नन्वेवं विरोधस्यापारमार्थिकत्वं। तद्वारेण क्षणभङ्गसिद्धिरप्यपारमार्थिकी स्यादिति चेत्। न हि विरोधोनाम वस्त्वन्तरं किञ्चित् उभयकोटिदत्तपादं सम्बन्धाभिधानमिष्यतेऽस्माभिरुपपद्यते वा। येनैकसम्बन्धिनो वस्तुत्वाभावेऽपरमार्थिकः स्यात्। यथा त्विष्यते तथा पारमार्थिक एव। विरुद्धाभिमतयोरन्योऽन्यस्वरूपपरिहारमात्रं विरोधार्थः। तच्च भावाभावयोः पारमार्थिकमेव न भावोऽभावरूपमाविशति। नाप्यभावो भावरूपं प्रविशतीति योऽयमनयोरसङ्करनियमः स एव

पार(२६)मार्थिको विरोधः। कालान्तरैकरूपतया हि नित्यत्वं। क्रमाक्रमौ क्षणद्वयेऽपि भिन्नरूपतया ततो नित्यत्वक्रमाक्रमिकार्य्यकारकत्वयोर्भावाभाववत्विरोधोऽस्त्येव। ननु नित्यत्वक्रमयौगपद्यवत्त्वञ्च विरुद्धौ विधूय नापरो विरोधोनाम। कस्य वास्तवत्वमिति चेत्। न। न हि धर्म्मान्तरस्य सम्भवेन विरोधस्य पारमार्थिकत्वं ब्रूमः। किन्तु विरुद्धयोर्धर्म्मयोः सद्भावेऽन्यथा विरोधनामधर्म्मान्तरसम्भवेऽपि यदि न विरुद्धौ धर्म्मौ क्व पारमार्थिकविरोधसद्भावः। विरुद्धौ च धर्म्मौ तावतैव तात्त्विको विरोधव्यवहारः। किमपरेण प्रतिज्ञामात्रसिद्धेन विरोधनाम्ना वस्त्वन्तरेण। तदयं पूर्व्वपक्ष[1]संक्षेपः।

नित्यन्नास्ति न वा प्रतीतिविषयस्तेनाश्रयासिद्धता
हेतोः स्वानुभवस्य च क्षतिरतः क्षिप्तः सपक्षोऽपि च।
शून्यश्च द्वितयेन सिध्यति न वा सत्तापि सत्तायथा
नोनित्येन विरोधसिद्धिरसता शक्या क्रमादेरपीति॥

अत्र सिद्धान्तसंक्षेपः।

धर्म्मस्य कस्यचिवदस्तुनि मानसिद्धा
बाधाविधिव्यवकृतिः किमिहास्ति नो वा।

---

१ A omits पूर्व्वपक्षं।

काप्यस्ति चेत् कथमियन्ति न दूषणानि
नास्त्येव चेत् स्ववचनप्रतिरोधसिद्धिरिति ॥

तदेवं नित्यं न क्रमिकार्य्यकारित्वाक्रमिकार्य्यकारित्वयोगिपरमार्थः। ततश्च सत्तायुक्तमपि नैव परमार्थतः। ततश्च क्षणिकाक्षणिकपरिहारेण राश्यन्तराभावाद्-क्षणिकाद्विनिवर्त्तमानमिदं सत्त्वं क्षणिकत्व एव विश्राम्यन्ते न व्याप्तं सिध्यतीति सत्त्वात् क्षणभङ्गसिद्धिरविरोधिनी ॥

प्रकृतेः सर्व्वधर्म्माणां यद्बोधान्मुक्तिरिष्यते।
स एव तीर्थनिर्म्माथी क्षणभङ्गः प्रसाधितः ॥
विपक्षे बाधनाद्धेतोः साध्यात्मत्वं प्रसिध्यति।
तत् सिद्धौ द्विविधा व्याप्तिसिद्धिरचाभिधीयते ॥

इति वैधर्म्म्यदृष्टान्ते व्यतिरेकरूपव्याप्त्या क्षणभङ्गसिद्धिः समाप्ता ॥ ० ॥

कृतिरियं महापण्डितरत्नकीर्त्तिपादानाम् ॥ ० ॥

पण्डिताशोकरचितम्

# अवयविनिराकरणम्।

नमः समन्तभद्राय ॥

अभ्यासातिशयस्तथा न विहितस्तादृक् श्रुतं नार्ज्जितं।
तन्मे चापलमर्थलेशमधुनानिर्म्मातुमीहे यदि।
एतत् सर्व्वमवेक्ष्ययन्निगदितं तत्पण्डितैर्दृश्यताम्।
प्रीणन्त्येव वि++++हि शिशोः प्रायः पितॄणां मनः ॥

यो विरुद्धधर्म्माध्यासवान् नासावेकः। यथा घटादिरर्थः। विरुद्धधर्म्माध्यासवांश्च स्थूलोनीलादिरर्थ इति व्यापकविरुद्धोपलब्धिः। इह दृश्यमानस्थूलोनीलादिरर्थो धर्म्मौ, स चानुभवावसितोऽसति बाधके प्रत्यक्षसिद्धो हेतोराश्रयासिद्धिं निहन्ति। ननु भवद्भिरसन्नेवावयवी प्रतिज्ञायते स कथं प्रत्यक्षसिद्धः। नावयविनमिह धर्म्मिणं प्रतिपन्नाः स्मः किन्तु प्रतिभासमानस्थूलनीलादिकमर्थम्। न तर्हि विरुद्धधर्म्मसंसर्गादवयविन एकत्वं निषिद्धं स्यात्। यद्येवं कस्तर्हि भवतोऽवयवी। एकोऽनेकावयवसमवेतार्थ इति चेत्। स किं प्रतिभास-

मानात् स्थूलनीलादेरन्योऽनन्यो वा। न तावदन्यः, दृश्यत्वेनाभ्युपगमात्। न च प्रतिभासमानस्थूलनीलार्थव्यतिरेकेणापरः प्रतिभाति। अनन्यश्चेत्। तस्यैकत्वप्रतिक्षेपे कथमप्रतिषिद्धमेकत्वमवयविनः।

ननु च प्रतिभासमानश्चेदर्थोनावयविरूपोधर्म्मौ। किन्तर्हि रूपमस्यावशिष्टप्रसिद्धं भविष्यतीति। उच्यते, प्रतिभासमानः स्थूलोनीलाकारः प्रत्यक्षसिद्धं °रूपं, अवयवित्वानभ्यु(२)पगमेऽप्यवशिष्यते। न चैवं मन्तव्यं। न परमाणुसञ्चयवादिनां स्थूलाकारः कश्चिदर्थोऽस्ति यः प्रसिद्धो धर्म्मौ स्यादिति। अवयव्यनभ्युपगमेऽपि हि निरवयवानेकात्मकः स्थूलोऽर्थोभ्युपगम्यमानः केन निषिद्धः। स्यान्मतं निरवयवाः परमाणवः कथं प्रत्यक्षे स्थूलेनाकारेणावभासेरन्, स्थूलसूक्ष्मयोर्विरोधादिति। तदपि न युक्तं। परमाणव एव हि पररूपदेशपरिहारेणोत्पन्नाः परस्परसहिता अवभासमाना देशवितानवन्तो भासन्ते। विततदेशत्वञ्च स्थूलत्वं, यत्तूक्तं स्थूलसूक्ष्मयोर्विरोध इति तत् किं पररूपदेशपरिहारवती निरवयवानामुत्पत्तिः। परस्परसहितानामेकविज्ञानावभासित्वं वा विरुद्धमिति वक्तुमध्यवसितं। इदञ्चेद्विरुद्धं स्थूलाकारः किं विरुद्धः। अतएव निरवयवेषु बहुष्वेकस्मिन् विज्ञाने प्रतिभास-

मानेषु भवन् प्रतिभासकालभावी प्रतिभासधर्म्मः स्थूलाकारो न तु वास्तवः प्रत्येकमभावात्। प्रतिभासात् प्रागूर्द्धं वा न तर्हि स्थूलोऽर्थ इति चेत्। न तदापि प्रतिभासयोग्यतासम्भवात् यदैव हि सञ्चिता भवेयुस्तदैव प्रतिभासयोग्याः परमाणवः। यदा च प्रतिभासयोग्या स्तदा स्थूलाः। यस्त्वाह निरवयवेषु वहुषु प्रतिभासनानेष्ववश्यमन्तरेणापि प्रतिभासितव्यं। अन्तरानवभासे परस्परविविक्ता एव नावभासिताः स्युः। विविक्तानवभासे चाणुमात्रकं पिण्डो भवेत्। न चान्तरमवभासमानमुत्पश्यामः। तदयं निरन्तर एक एव स्थलो निरवयवानेकात्मको भवितुमर्हति, अपि त्वेकः स्थूलात्मक एवेति। सोऽप्येवं वाच्यः। किं विजातीयपरमाण्वन्तरमन्तरं। आहोस्वित् शून्याकाशयोगः। तच्च शून्याकाशयोगस्तावदवस्तुतया नेन्द्रियप्रत्यक्षगोचरः। अर्थसामर्थ्यभाविनि तत्रार्थस्यैव प्रतिभासोपपत्तेः। विजातीयस्त्विन्द्रियान्तरग्राह्यं कथमिन्द्रियान्तरज्ञानेऽवभासेताविषयत्वात्। तत् केनान्तरेणावभासितव्यमिति न विद्मः। यत् पुनरुच्यते। अन्तरालानवभासे विविक्ता नावभासेरन्निति।

तत्रापि किमेषामन्तरं विवेकः पररूपशून्यता वेति

चिन्त्यं। निरूपयन्तस्तु पररूपशून्यतामेव विवेकं वस्तूनां पश्यामः। पररूपशून्याश्चेमे भासमानाः कथं विविक्ता नावभासेरन्निति। ननु च न प्रत्येकं परमाणूनां स्थूलाकारः। ततः समुदितानामेष्टव्यः। यथा च नीलपरमाणूनां प्रत्येकमसम्भवन् पीताकारो बहुष्वपि न दृश्यते। तथा प्रत्येकमसम्भवन् स्थूलाकारः कथं बहुषु स्यादिति।

उक्तमत्र। अविरुद्धो निरवयवाणां स्थूलाकार इति। (३) नीलविरुद्धस्तु पीताकारः। ततः पीतविरुद्धं नीलाकारं विभ्राणेषु बहुष्वपि कथं पीताकारो भवेत्। नैवं निरवयवत्वविरुद्धः स्थूलाकारः यथोक्तान्यायात्। तदेवं प्रत्यक्षसिद्धः स्थूलोऽर्थ इह धर्म्मीति व्यवस्थितं। तदेवमवस्थिते धर्म्मिणि हेतोः सत्त्वमसत्त्वं वा निरूप्यं। तच्च पाण्यादावेकस्मिन् कम्पमाने स्थूलोऽर्थः सकम्पनिःकम्पे रूपे युगपत् प्रतिपद्यमानः कथं विरुद्धधर्म्मसंसर्गवान्न स्यात्। सकम्पनिःकम्पयोर्हि रूपयोः परस्पराभावाव्यभिचारनिमित्तकोऽस्ति विरोधः। भावाभावयोरेव हि परस्परपरिहारात्मको विरोधः। वस्तुनोस्तु तदभावाव्यभिचारेणैव। इह च सकम्पनिःकम्पे रूपे गृह्णत् प्रत्यक्षमेव सामर्थ्यात् परस्पराभावं साधयति।

व्यवहारयति तु निर्विशेषणैवानुपलब्धिः । स्यादेतत् पाण्यादावेकस्मिन्नवयवे कम्यमाने नावयविनः कम्य रूपमभ्युपेयं । अवयव एव हि तदा क्रियावान् दृश्यते । न चेदं मन्तव्यं । अवयवे क्रियावति तदाधेयेनावयविनापि क्रियावता भवितव्यं, यथा रथे चलति तदारूढोऽपि चलतीति । अवयवावयविकर्म्मणोभिन्ननिमित्तत्वात् । निमित्तायोगपद्याच्च । यदा हि आत्मनः पाणिकम्यनेच्छा भवति । ततः प्रयत्नः । तदा प्रयत्नवदात्मपाणिसंयोगात् पाणौ क्रिया । यदा तु शरीरकम्यनार्थः प्रयत्नविशेष आत्मनो जायते । तदा तत्प्रयत्नवदात्मशरीरसंयोगात् शरीरे कर्म्मेति निमित्तभेदः । अतो भिन्नमिति तयोरेकस्मिन् जाते कथं निमित्तान्तरप्रतिबद्धजन्मा तदभावे तदपरोऽपि तथैव जायेत । रथ तदारुढकर्म्मणोस्तु सत्यपि निमित्तभेदे निमित्तयौगपद्यात् सहभावः । तथा हि नोदनं रथकर्म्मणोऽसमवायिकारणं । तदारुढकर्म्मणस्तु नोद्यसंयोगः । तयोश्च सहभावात् कर्म्मणी अपि यौगपद्येन जायेते । तदेतत् सकलमालोच्य भदन्तधर्म्मोत्तरेणेदमुक्तम् । न चावयवः क्रियावान् । अवयवेषु हि क्रियावत्सु विभागो जायते । क्रियाया विभागारम्भं प्रति निरपेक्षकारण-

त्वात् । तेन च संयोगेऽसमवायिकारणे निवर्त्तते निवर्त्तेतावयवि द्रव्यमिति । इदमाहुरच कणादशिष्याः । नोदनादभिघाताद्वा जायमानः क्रियाविशेषो द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागारम्भको दृष्टः । अन्यत्तु विभागमात्रमारभते न तु यथोक्तविशेषं । अन्यस्मिन् पद्मसङ्कोचविकाशादिके कर्म्मण्यवयवसंयोगनिवृत्तेरदर्शनात् (४)॥ तद्वत् प्रयत्नजन्यस्यापि कर्म्मणो नास्ति संयोगनिवर्त्तनसामर्थ्यं । ततो नास्ति द्रव्यनिवृत्तिरिति । अयमच समाधिः । इहावयविनि क्रियावति नियमेनावयवैरपि क्रियावद्भिर्भवितव्यं । अन्यथावयवसंसृष्टेभ्य आकाशदेशेभ्यो विभागोऽवयवासंसृष्टेश्च संयोगोवयविनः क्रियावतः स्यात् । अवयवास्तु क्रियाविरहिणः पूर्व्वाक्रान्तेभ्यो नभोदेशेभ्यो नापसर्य्येयुः । अवयविसमाक्रान्तैश्च देशैर्नाभिसम्बध्येरन् । न चावयविसंयोगविभागाभ्यामवयवसंयोगविभागौ वाच्यौ । कार्य्यसंयोगविभागयोः कारणसंयोगविभागौ प्रति निमित्तभावानभ्युपगमात् । कारणसंयोगविभागावेव हि कार्य्यसंयोगविभागावारभेते ।

न च विपर्य्ययः सिद्धान्तहानिप्रसङ्गात् । तेनावयवावयविनां पृथग्देशत्वादाधार्य्याधारभावहानौ समवायोऽपि न व्यवतिष्ठेत । तस्मादवयविनि क्रियावति अव-

यवाः क्रियावन्त इत्यकामकैरपि वैशेषिकैरिदमभ्युपेयं। यथा चावयविक्रियायामवयवाः क्रियावन्त स्तथावयवेष्वपि क्रियावत्सु तद्वयवैः क्रियावद्भिर्भाव्यमिति। अनया दिशा द्व्यणुके क्रियावति तदारम्भकौ परमाणू क्रियावन्तौ मन्तव्यौ।

अतश्चलावयवसम्बन्धिनश्चलाः परमाणवः। निःक्रियावयवसम्बन्धिनस्तु निःक्रिया। परमाणुक्रियायां तदारब्धमपि द्व्यणुकद्रव्यं क्रियावत् प्रसज्येत। सर्व्वावयवक्रियायाः कार्य्यक्रियाऽविनाभूतत्वात्। एकस्य परमाणोः क्रिया न परस्येति चेत्। सक्रियनिःक्रियौ तर्हि परमाणू परस्परं विभज्यमानावुज्झितद्रव्यारम्भकसंयोगौ स्यातां। ततश्च द्रव्यनाशः। एवञ्च द्व्यणुकद्रव्यस्य क्रियावत्त्वे त्र्यणुकेऽपि क्रिया स्यादित्यनेन क्रमेण परिदृश्यमानोऽचलश्चलः स्यादवयवः। तस्मान्निःक्रियावयवसम्बन्धिनो निःक्रियाः परमाणवश्चलावयवसम्बन्धिभ्यश्चलेभ्यो विभज्यमाना द्रव्यारम्भकसंयोगविनाशवन्तः स्युः। निरवयवो हि परमाणुर्यमणुमाचनभोदेशमाक्रम्य परमाण्वन्तरेण संयुज्यते। ततो विभज्यमानः कथमनुज्झितपरमाण्वन्तरप्रत्यासत्तिकः स्यात्। सावयवो हि भाव एकेनावयवेन वस्त्वन्तरसंयुक्त एवावयवान्तरै श्चलैः।

पूर्व्वाक्रान्तान्नभोदेशान् विरहय्य देशान्तरमाक्रामेत् । निरवयवेषु त्वत्यन्तमस्तमितेयं कथेति युक्तं द्रव्यनाश-प्रसङ्गमुत्पश्यामः ।

अथवान्यथायं विरुद्धधर्म्मसंसर्गः । तथाह्यावृते एकस्मिन् पाण्यादौ स्थूलस्यार्थस्यावृतानावृते रूपे युगपद्भवन्तौ विरुद्धधर्म्मद्वयसंयो( ५ )गमस्यावेदयतः । न चानावृतैकरूप एवायमिति शक्यं वक्तुं । अर्द्धावरणेऽपि अनावृतस्य पूर्व्ववद्दर्शनप्रसङ्गात् । अवयवदर्शनायत्तोपलब्धेः । तद्दृष्टौ अस्या दृष्टिरिति चेत् । अदृष्टिरेव तर्हि अस्यास्तु । न तु दृष्ट्यदृष्टी । नन्वस्त्येवावयविदर्शनमवयवावरणेऽपीति कोऽयं प्रसङ्गः । एवन्तर्हि स्थूलः प्राग्वदुपलभ्येत । इदमचाह कश्चित् । भूयोऽवयवेन्द्रियसन्निकर्षसहायोऽवयवीन्द्रियसन्निकर्षः स्थूलोपलब्धेर्निमित्तं, न चार्द्धावरणे भूयसामवयवानामस्तीन्द्रियसन्निकर्षः ततो न स्थूलग्रहणमिति । सोऽप्येवं प्रष्टव्यः । किं स्थूलो नामावयविनोऽन्यः । स एवानेकव्यापी स्थूलः । तच्च यद्यवयव्येव स्थूलः । तदा तद्ग्रहणे कथन्न स्थूलग्रहणमिति चिन्त्यम् ।

अथ स्थूलत्वाख्यः परिमाणविशेषो गुणः स द्रव्यादन्य एवेति चेत् । एवन्तर्हि परिमाणरहितमेव तत् द्रव्यमुप-

लभ्यते । न त्वस्यान्येनान्येन परिमाणेन योगः । न चास्यानेकपरिमाणकल्पनापि साध्वी । युगपत् सर्व्वेषामनुपलब्धेः । न च दृश्यस्य दर्शननिवृत्तिर्युक्ता । अवयवस्यैव तत् परिमाणमुपलभ्यत इति चेत् । यद्येवं स एव तर्ह्यवयवः स्वेन परिमाणेन सम्बद्धः प्रत्यक्षोत्वावरणकालेनावयवी । स्यादेतदेकार्थसमवायाद्भ्रान्तिनिमित्तादवयव्येवावयवपरिमाणेन सम्बद्धः प्रतिभातीति तदपि न शोभनं । द्वयोः समपरिमाणयोरवयवावयविनोः प्रतिभासप्रसङ्गः । यस्य हि महतोऽवयवस्य तत परिमाणं स तावत् स्वेन परिमाणेन सम्बद्धः प्रतिभाति । अवयविनश्च तत्परिमाणसम्बद्धप्रतिभासाभ्युपगमे द्वयोः समपरिमाणयोरयवायवविनोः प्रतिभास आसज्यते ।

न चास्ति यथोक्तः प्रतिभासः परिमाणरहितः । सोऽवयवः प्रतिभास इति चेत् । स्यादेतद्यस्यावयवस्य परिमाणेनावयवी सम्बद्धः प्रतिभाति स स्वं परिमाणं परित्यज्याभातीति । इदमपि परिमाणविरहिणोवयवस्यादृष्टेरशक्यं कल्पयितुं । एकार्थसमवायाच्च भ्रान्ति निमित्तादल्पतरावयवपरिमाणवानप्यवयवी प्रतिभासेत । न च बाधकमन्तरेण भ्रान्तिरपि शक्या व्यवस्थापयितुम् ।

अस्ति तर्हि स्थूलोऽवयव एव प्रत्यक्षः । एवमावरण-काल इवानावरणावस्थायामपि स्थूलतरोऽवयवः प्रत्य-क्षोऽस्तु । परमध्यवर्त्तिनामवयवानामिन्द्रियसन्निकर्षा-भावे स्थूलतमावयविदर्शनानुपपत्तेः स्यान्मतं निखिला-वयवदर्शनं न स्थूलप्रत्यक्षकारणं । किन्तु भूयोऽवयव-दर्शनमिति । इदमपि न सम्यक् । अभिमुखावस्थितस्य हि पर्व्वतादेरर्व्वाचीनावयवदर्श(ई)नेन तथा स्थूलप्रति-पत्तिर्यथार्व्वाक्परमध्यवर्त्तिनां दर्शने । ततो न याव-न्निरवशेषावयवदर्शनं तावत् कथं स्थूलतमार्थप्रतिपत्तिः स्यात् । न चावयवा अर्वाक्परमध्यवर्त्तिनो युगपद्दृश्यन्ते । तत् कथमवयवी स्थूलो दृश्येत । क्रमेण दिशामवयवानां प्रत्यक्षीकरणे प्रत्यक्षः स्थूलोऽवयवीति चेत् । अन्यदा तु कः प्रत्यक्षः इति विमृष्यं । अवयव इति चेत् । अवयवी अपि परमध्यवर्त्तिनो न युगपद्दृश्यन्त इति कथं सोऽपि प्रत्यक्षः स्यात् । तदेवं नावयवी नावयवाः प्रत्यक्षा इति न किञ्चिद्दृश्येतेति । तत् सिद्धमावृतानावृतरूपः स्थूलोऽर्थ इति ॥

तथा रागारागाभ्यां विरोधः सम्भावनीयः । तथा ह्येकस्मिन्नुक्ते स्थूलोऽर्थो रक्तारक्ते रूपे युगपत् प्रति-पद्यमानो विरुद्धरूपद्वययोगमात्मनः प्रकाशयति । नन्व-

वयव एव रक्तोऽवयवी त्वरक्तैकरूप एवेति । यद्येवं रक्तेऽवयवेऽरक्तरूपोऽवयवी दृश्येत । न चैवं । अथवा रागद्रव्यसंयोगो हि रक्तत्वं । अवयवस्य च रागद्रव्येण संयोगेऽवयविनोऽपि तेन भाव्यं । अवश्यं हि कारणसंयोगिना कार्य्यमपि संयुज्यत इति समयात् । यस्त्वाह रक्त एवावयवी । अस्ति हि कुङ्कुमारक्ते पटावयवे कुङ्कुमारक्तः पट इति प्रत्ययः । ततो रागद्रव्यसंयुक्त एवावयवीति तस्यापि वर्णान्तरानवभासः स्यादवयविनः । रागद्रव्यं हि प्रत्यासीदत् निजरूपं वस्तुन स्तिरोधत्ते स्वेन च रूपेण द्रव्यं सम्बध्नाति । यथा रक्तोवयवस्तिरोहितसहजरूपो रागद्रव्यसमवायिना रूपेण सम्बन्धी प्रतिभाति । अवयविन्यपि रागद्रव्यसंयोगिनि वर्णान्तरानवभासप्रसङ्गो दुर्व्वारः । तन्न रक्त एवावयवीति शक्यं वक्तुम् ।

अन्यस्तु संयोगस्याव्याप्यवृत्त्या समाधत्ते । स ह्याह शब्द इवाव्याप्यवृत्तिः संयोगः । तेनैकार्थौ रक्तश्चारक्तश्चेति । सोऽप्येवं पर्य्यनुयोज्यः । कथमव्याप्यवृत्तिः । यदि हि स्वाश्रये समवेतो रूपादिवत् व्याप्यवृत्तिरेवायं । असमवेतश्चावृत्तिरेवाप्यद्रव्येष्विव गन्धः । एकच संयोगस्य भावाभावाव्यापिनो वृत्तिरिति चेत् । स्यादेतद्यथा विरु-

द्वावपि रूपरसावेकमाश्रयेते। तथा संयोगस्याप्येकच भावाभावौ युगपत् स्याताम्।

अहो मोहविजृम्भितं। अभावो हि भावनिवृत्तिरूपो नास्य भावनिवृत्तिं हित्वा रूपान्तरमीक्षते। यश्च यन्निवृत्तिरूपः स कथं तस्मिन् सत्येव भवति। भावे वा तन्निवृत्तिरूपतां जह्यात्। तथा ह्यनलं पश्यन्नपि सलिलार्थी तत्र प्रवर्त्तेत। जलविविक्तस्यानलस्य दर्शनात्। जलाभावसिद्धेरप्रवृत्तेरिति चेत्। भवत्वनुपलभाज्जलाभावसिद्धिस्तथापि ज( ७ )लसत्तां सम्भावयन् जलार्थी प्रवर्त्तेत। ननु तत्र यदि जलं स्यादुपलभ्येत किमतः। अतोऽनुपलम्भादभावो जलस्येति। यद्यप्यभ्युपगतैव जलाभावसिद्धिः। तथापि तदर्थिनस्तद्भावशङ्कया प्रवृत्तिः स्यात्। युगपदेकत्र संयोगस्य भावाभावौ दृश्येते। तेनैवं कल्पयामो न स्वेच्छया। ननु किमभावोभावप्रतिषेधात्मकः प्रतीयते। अन्यथा वा। तत्र भावनिवृत्तिरूपे ऽभावे सिद्धे कथं भावोपलब्धिर्न भ्रान्ता स्यात्। भावाप्रतिषेधात्मकश्च नाभावः। नाममात्रन्तु स्यात्। न च नाममात्रादर्थस्य तथाभावः। रूपरसयोस्तु न परस्परनिवृत्तौ रूपमिति कथं तदुदाहरणमिह शोभेत। न च रूपरसयोरेकत्र समवायोऽस्माभिरनु-

मन्यते। शब्दोऽप्येवमेवाव्याप्यवृत्तिरसिद्धः स कथं प्रकृत-संशयनिवृत्तये कल्प्येतेति । अलं बहुभाषितया ॥

अथवा स्थूलोऽर्थस्तदतद्देशः प्रतीयते । तद्देशयोश्च परस्पराभावाव्यभिचारनिमित्तोऽस्ति विरोधः । अतो विरुद्धधर्म्मसंसर्गः स्थूलस्य । स्यादेतत् कथं तदतद्देशयोः परस्पराभावाव्यभिचारः । उच्यते । इह तावदेकस्मिन् देशे परिच्छिद्यमाने तादूप्यप्रच्युतिरस्य व्यवच्छिद्यते । तद्व्यवच्छेदे तत्परिच्छेदाभावप्रसक्तेः । प्रच्युतिवच्च प्रच्युतिमदपि देशान्तरं व्यवच्छिद्यते । यदि हि परि-च्छिद्यमानो देशान्तरस्वभावो भवेत्तदा तद्रूप एवो-पलब्धो भवेत् । देशान्तररूपन्तु विरहय्य स्वेन रूपेण प्रकाशमानो देशो देशान्तरासंसृष्ट इत्यवसीयते । यथा च देशस्य देशान्तरासंसर्गस्तथा तेनाधारभूतेन देशेन यद्व्याप्तं रूपं तदपि देशान्तरसंसर्गादविच्छिन्नं भवति । कथं हि तेन देशेन व्याप्तं रूपं तद्भाववति देशान्तरे वर्त्तेत । यथा एकेन देशेन व्याप्तो घटो न देशान्तरे वर्त्तते । देशान्तरे ऽनुपलम्भादवृत्तिरिति चेत् । विप्रकृष्टे देशान्तरे कथमस्याभावः प्रतिपत्तव्यः । तस्मादि-दमकामकेनापि वाच्यं । यदुत एकदेशव्याप्तं रूपं न देशान्तरे वर्त्तते इति । तस्य तेन व्यापनप्रसङ्गात् ।

तद्भाववति देशान्तरे वर्त्तमानोऽपि तेन देशेन व्याप्येत । न च व्याप्तिरस्य शक्यावसातुं । भागान्तरासम्भवात् । एतेन तन्निरस्तं । यदाह कश्चित् । यथैकोभावस्तदतद्देशं जनयन्नविरुध्यत इति । तदपि न प्रकृतानुरूपम् ।

तथाहि भावाभावावेव परस्परपरिहारेण विरुद्धौ न वस्तुनी । वस्तुनोस्तु परस्पराभावाव्यभिचारेण विरोधः । तेन यदेव वस्तु वस्त्वन्तरप्रच्युतिमत् तदेव तेन विरुद्धं । न चैककार्य्यनिवर्त्तनशक्तिः कार्य्यान्तरशक्त्यभावाव्यभिचारिणी । अनुपलम्भो हि वस्तुनो वस्त्वन्तराभा(ट)वाव्यभिचारं साधयति । एककार्य्यनिवर्त्तनशक्तिमति च रूपे गृह्यमाणे कार्य्यान्तर निवर्त्तनशक्तिरपि परिच्छिद्यत इति । कथं तद्भावः । एकदेशसम्बद्धं तु रूपं देशान्तरसंसर्गिरूपपरिहारेणोपलभ्यमानन्तद्भावाव्यभिचारि तेन विरुद्धं । यथात्यन्तसदृशोर्वस्तुनोर्युगपदुपलभ्यमानयोः सत्यपि चाकारभेदे दूरादनुपलक्ष्यमाणभेदयोर्देशभेदमात्रनिमित्तकं प्रत्यक्षावसितं विरोधमाश्रित्य भेदोऽवस्थाप्यते । यस्त्वाह । यथैकं चक्षुर्विज्ञानं भिन्नेषु चक्षुरादिषु वर्त्तते तदधीनोत्पादतया । तथान्योऽपि भिन्नदेशनिवृत्तिर्न भेत्स्यत

इति । सोऽपि देशभेदनिमित्ते विरोधेऽवस्थाप्यमाने वस्तुनः कारणभेदनिमित्तं विरोधमासञ्जयन् न नैपुण्यमात्मनो निवेदयति । न हि विज्ञानस्य देशोऽस्ति कश्चित् । अमूर्त्तत्वात् । स्यादेतत् । यथा देशभेदनिमित्तो विरोधस्तथा कारणभेदनिमित्तोऽपि स्यात् । को हि वस्तुतो विशेषः, कारणभेदादेशभेदस्येति ।

उक्तमिह । परस्पराभावाव्यभिचारनिमित्तो वस्तूनामस्ति विरोधः । स देशभेदेऽपि सन्निधीयेते न कारणभेदे । देशभेदवतौ हि रूपेऽन्योऽन्यपरिहारेणोपलभ्यमाने । परस्पराभावाव्यभिचारिणौ भवतो न कारणभेदवतौ । तदेवं कम्परागावरणभावाभावकृते देशभेदनिबन्धने च चतुर्थे विरुद्धधर्म्मसंसर्गेऽवयविविषये व्यवस्थापिते पक्षधर्म्मत्वं सिद्धं हेतोः । अधुनाव्याप्तिरेवास्य स्वसाध्येन समर्थनीया । इह विरुद्धधर्म्मसंसर्गविरहमात्रनिबन्धनो भेदव्यवहारो वस्तूनां दृष्टः, अहेतोरयोगात् । निमित्तान्तरस्य वाऽदर्शनात् । ततो विरुद्धधर्म्मसंसर्गेऽपि भवन्भेदव्यवहारो व्यापकं निमित्तवत्त्वं जह्यात् । ततो व्यापकानुपलब्ध्या तस्माद्यावृत्तो विरुद्धधर्म्मविरहेण व्याप्यते । तद्विरुद्धश्च विरुद्धधर्म्मसंसर्गः । तेनेयं व्यापकविरुद्धोपलब्धिभूमिका । एवं

प्रसाधितेऽस्यास्वैरूप्येऽसिद्धविरुद्धानैकान्तिका दोषा नावकाशं लभन्ते इति ॥

एवं मया बहुषु दुर्म्मतिनिर्म्मितेषु
प्रत्युद्धृतेषु खलु दूषणकण्टकेषु ।
आचार्य्यनीतिपथ एव विशोधितोऽय-
मुत्सार्य्यमत्सरमनेन जनः प्रयातु ॥

समाप्तश्चेदमवयविनिराकरणमिति ॥

पण्डिताशोकविरचिता

# सामान्यदूषणादिक्प्रसारिता।

व्यापकन्नित्यमेकञ्च सामान्यं यैः प्रकल्पितं।
मोहग्रन्थिच्छिदे तेषां तदभावः प्रसाध्यते॥

कथमिदमवगम्यते। परस्परविलक्षणक्षणेषु प्रत्यक्षसमीक्ष्यमाणेष्वभिन्नधीध्वनिप्रसवनिबन्धनमनुयायिरूपं सामान्यं न मान्यं मनीषिणामिति। साधकप्रमाणविरहात् बाधक(ऽ)प्रमाणसम्भवाच्चेति ब्रूमः। तथाहि यदिदं सामान्यसाधनमनुमानमभिधीयते परैः। यदनुगताकारं ज्ञानं तदनुगतवस्तुनिबन्धनं यथा बहुषु पुष्पेषु खक् खगिति ज्ञानं। अस्ति च परस्परसम्पर्कविकलकलासु कार्य्यादिव्यक्तिष्वनुगताकारं विज्ञानं तदनैकान्तिकतादोषाक्रान्तशरीरत्वान्न तद्भावसाधनायालं। यतो भवति बहुषु पाचकेषु पाचकः पाचक इति एकाकारपरामर्शप्रत्ययः। न च तेष्वनुगतमेकं वस्तु समस्ति। तद्भावे हि प्रागेव तथाविधप्रत्ययोत्पादप्रसङ्गो दुर्व्वारप्रचारः। क्रियोपकारापेक्षाणां स्वलक्ष-

णानां सामान्यव्यञ्जकत्वादयमदोष इति चेत् । नैतदस्ति । नित्यानामनाधेयातिशयतयाऽनुपकारिणि सहकारिण्यपेक्षाऽयोगात् । सातिशयत्वे वा प्रतिक्षणं विशरारुशरीरत्वात् क्रिया कुत इति दोषोदुष्परिहरः । क्रियानिबन्धनत्वात् पाचकेष्वनुगताकारप्रत्ययस्य नानैकान्तिकतादोष इत्यपि वार्त्तं । प्रतिभेदं भिद्यमानानां कर्म्मणां तन्निबन्धनत्वायोगात् । भिन्नानामप्यभिन्नाकारज्ञाननिबन्धनत्वे व्यक्तीनामपि तथा भावो न राजदण्डनिवारितः । ततश्च सामान्यमेव नोपेयं स्यात् । इति मूलहरं पक्षमाश्रयता देवानांप्रियेण सुष्ठ् अनुकूलमाचरितं । अनेनैव न्यायेन क्रियाकारकसम्बन्धमभिन्नज्ञाननिबन्धनमुपकल्पयन् प्रतिक्षिप्तः । पाकक्रियात्वनिबन्धनः पाचकेष्वनुगताकारः प्रत्ययस्ततो नानैकान्तिकतादोष इत्यपि न मन्तव्यं । नह्यर्थान्तरसम्बन्धिनौ जातिरर्थान्तरप्रत्ययोत्पत्तिहेतुः, अतिप्रसङ्गात् । स्यादेतत् समवेतसमवायसम्बन्धबलात् पाकक्रियासामान्यं पाचकेष्वभिन्नाकारं परामर्शप्रत्ययमुपजनयति ततो न यथोक्तदोषः । तदिदमप्यसारं । यत् उदयानन्तरापवर्ज्जितया कर्म्मणामेवासम्भवात्, विनष्टे कर्म्मणि तत् सामान्यं न कर्म्मणि तदभावादेव नापि

कर्त्तरीति सम्बन्धसम्बन्ध्योप्यस्य नास्तीति नाभिन्नप्रत्ययहेतुः । तस्मात् स्थितमेतत्तदनैकान्तिकतादोषदुष्टत्वान्नेदमनुमानं सामान्यसत्त्वासाधनाय पर्य्याप्तमिति । इतश्चापि न सामान्यसत्त्वासाधनमिदमनुमानं । यथैव हि परस्परासङ्कीर्णस्वभावा अपि शबलेयादयोभावाः कयाचिदेव तदेककार्य्यप्रतिनियमलक्षणया स्वहेतुबलायातया प्रकृत्या तदेकमभिमतमनुगतरूपमुपकुर्व्वते, तदपरसामान्यान्तरमन्तरेणान्यथानवस्थाप्रसङ्गात् । तथा तमेकं परामर्शप्रत्ययमुपजनयन्तु किमन्तरालगडुना व्यतिरेकवता सामान्येनोपगतेन ।

अथोच्यते प्रतिनियतशक्तयः सर्व्वभावाः । एतच्च सामान्यापलापिभिरपि ( १० ) नियतमभ्युपगमनीयं । अन्यथा कुतः शालिबीजं शाल्यङ्कुरमेव जनयति न कोद्रवाङ्कुरमिति । परपर्य्यनुयोगे भावप्रकृतिं मुक्त्वा किमपरमिह वचनीयमस्ति । एतच्चोत्तरमस्माकमपि न वल्मीकःकुलकवलितं, तथाहि वयमप्येवं शक्ता एव वक्तुं सामान्यमेवोपकर्त्तुं शक्तिव्यक्तीनां भेदाविशेषेऽपि न तदेकं विज्ञानमुपजनयितुमिति । अनुत्तरं वत दोषसङ्कटमचभवान् दृष्टिदोषेण प्रविश्यमानोऽपि नात्मानमात्मना सम्वेदयते । तथाहि शालिबीजतदङ्कुरयोर-

ध्यक्षानुपलम्भनिबन्धने कार्य्यकारणभावेऽवगते शालिबीजं शाल्यङ्कुरं जनयितुं शक्तं न कोद्रवाङ्कुरमिति शक्यमभिधातुं। नैवं सामान्यतद्वतोरुपकार्य्योपकारकभावः कुतश्चन प्रमाणान्निश्चितः। तत्कथमिदमुत्तरमभिधीयमानमादधीत साधिमानमित्यलमलीकनिर्बन्धनेन। न साधकप्रमाणविरहमात्रेण प्रेक्षावतामसद्व्यवहारः। ततस्तद्भावसाधकमनुमानमभिधीयमानमस्माभिराकल्यतां। यद्यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तदसदिति प्रेक्षावद्भिर्व्यवहर्त्तव्यं, यथाम्बराम्बुरुहं, नोपलभ्यते चोपलब्धिलक्षणप्राप्तं सामान्यं क्वचिदपीति स्वभावानुपलब्धिः। न चाचासिद्धिदोषोद्भावनया प्रत्यवस्थातव्यम्। तथा ह्यचासिद्धिर्भवन्ती स्वरूपतो विशेषणतो वा भवेत्। तच्च न तावदाद्यं सम्भवति। अन्योपलम्भरूपस्यानुपलम्भस्याभ्युपगमात्। तस्य च स्वसम्बेदनप्रत्यक्षसाक्षात्कृतस्वरूपत्वात् कुतः स्वरूपासिद्धदोषावकाशः।

अथोच्यते स्वसम्बेदनमेव न सम्भवति। स्वात्मनि क्रियाविरोधात्। न हि तयैवासिधारया सैवासिधारा च्छिद्यते। तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण स्पृश्यते इति। अतोऽसिद्ध एवायं हेतुः। तदिदं स्वसम्बेदनशब्दार्था-

परिज्ञानविजृम्भितमेव प्रकटयति वावः। तथाहि कलस-कलधौतकुवलयादिभ्यो व्यावृत्तं विज्ञानमुपजायते। तेन बोधरूपतयोत्पत्तिरेवास्य स्वसम्बित्तिरुच्यते, प्रकाश-वत्। न कर्म्मकर्तृक्रियाभावात्। एकस्यानंशरूपस्य चैरूप्यानुपपत्तितः। यथैव हि प्रकाशकान्तरनिरपेक्षः प्रकाशः प्रकाशमान आत्मनः प्रकाशक उच्यते। तथा ज्ञानमपि ज्ञानान्तरनिरपेक्षं प्रकाशमानमात्मनः प्रका-शमुच्यते। ततोऽयं परमार्थः। न ज्ञानं ज्ञानान्तरसंवेद्य-मुपपद्यते नाप्यसम्बिदितमुच्यते। यथाप्रकारे च स्वस-म्बेदनशब्दार्थे विवक्षिते न किञ्चिद् वचनीयकमस्ति कुतो यथोक्तदोषावसरः। नापि विशेषणासिद्धाऽसिद्धि-रुद्भावनीया। उपलब्धिलक्षणप्राप्ततया (११) सामा-न्यस्य स्वयमेव परैरुपगमात्। तथानभ्युपगमे वा न सामान्यबलेन वा कुलेयादिष्वनुगताकारौ धीध्वनी स्यातां। न हि यतो यच्च ज्ञानाभिधानप्रवृत्तिस्तदनुप-लक्षणे तस्य प्रतीतिर्भवति, दण्डिवत्। यत् पुनरिद-मुद्योतितमुद्योतकरेण। "किं सामान्यं प्रतिपद्यसे, न वा। यदि प्रतिपद्यसे कथमपह्नुषे। अथ न प्रतिपद्यसे तदा तस्यासिद्धत्वादाश्रयासिद्धो हेतुः। तदिदं तस्य धर्म्मिस्वरूपितानभिज्ञताविजृम्भितमाभाति। यतो न

वयं वहीरूपतया सामान्यं धर्म्मितयाऽङ्गीकुर्म्महे । अन्तर्म्माचाभिनिवेशिनो भावाभावोभयानुभवाहितवासनापरिपाकप्रभवस्याध्यस्तवहिर्वस्तुनो ज्ञानाकारस्य धर्म्मितयोपयोगात् ।

स च स्वसम्वेदनप्रत्यक्षसिद्धतया न शक्यः प्रतिक्षेप्तुं । तद्च धर्म्मिणि व्यवस्थिताः सदसत्त्वे चिन्तयन्ति । किमयं सामान्यशब्दविकल्पप्रतिभासार्थो धर्म्मी परपरिकल्पितवहिःसामान्यनिबन्धनो वेति । तस्य वाह्यानुपादानत्वे साध्यतयाऽनुपलम्भो हेतुः । न पुनस्तस्यैवाभावः साध्यते । तद्विषयशब्दप्रयोगप्रसङ्गात् । एवम्विधे च धर्म्मिणि विवक्षिते कुत आश्रयासिद्धिदोषः । यत्तूच्यते । प्रत्यक्षप्रमाणसिद्धस्वभावतया सामान्यस्यासिद्ध एवायं हेतुरिति । तदयुक्तं, तस्य स्वरूपेणाप्रतिभासनात् ।

इदमेव हि प्रत्यक्षस्य प्रत्यक्षत्वं यत् स्वरूपस्य स्वबुद्धौ समर्पणं । इदं पुनर्मूल्यादानक्रयि सामान्यं स्वरूपञ्च नादर्शयति प्रत्यक्षताञ्च स्वीकर्त्तुमिच्छति । तथाहि न वयं परस्परासंकीर्णशावलेयादिव्यक्तिभेदप्रतिभासनवेलायां तद्विलक्षणमपरमनुगतमध्यक्षेणेक्षामहे । कण्ठेशनमिव भूतेषु । शावलेयसामान्यबुद्धेरसिद्धेः । तत् कथमदृष्टकल्पनयात्मानमात्मना विप्रलभेमहि ।

इति नासिद्धो हेतुः। नाप्यनैकान्तिकता शङ्काविषयमतिपतति, विपक्षवृत्त्यदर्शनात् । असपक्षे सम्भवानुपलम्भात् । साधारणानैकान्तिकता माभूत । सन्दिग्धविपक्षव्यावृत्तिकता तु प्रतिबन्धादर्शनादनिवारित प्रसरैव ।

तदेतन्न समालोचिततर्ककर्कशधियामभिधानं। विपर्य्यये बाधकप्रमाणसामर्थ्यादपसारितसद्भावत्वात्तदाशङ्कायाः । तथाह्यसत्त्वे साध्ये सत्त्वं विपक्षः । तच्च प्रत्यक्षवृत्त्या भवितव्यं। यतो यद्यदाऽविकलाऽप्रतिहतसामर्थ्यं तत्तदा भवत्येव । तद्यथाऽविकलबलसकलकारणकलापोऽङ्कुरः । सति च चक्षुरादिसाकल्ये दृश्ये वस्तुन्यविकलाप्रतिबद्धशक्तिकारणं प्रत्यक्षं ज्ञानमिति स्वभावहेतुः । ततो विरुद्धोपलम्भाद्विपक्षाद्व्यावर्त्तमानो हेतुः। असद्व्यवहारयोग्यत्वेन व्याप्यत इति व्याप्तिसिद्धेर्नानैकान्तिकः । अभिमतसाध्य( १२ )प्रतिबन्धसिद्धेस्तु विरुद्धता दूरतरसमुत्सारितरभसप्रसरैव । अतोऽसिद्धतादिदूषणशङ्काकलङ्कालङ्कि( ङ्क )ताद्धेतोः प्रस्तुतवस्तुसिद्धौ सिद्धमसत्त्वं सामान्यस्येत्यलमतिबद्धविस्तरविसारिण्या कथयेति विरम्यते ।

न च वस्तुसंस्थानवत् सामान्यं व्यक्तेर्लक्षणं। न

चानुवृत्तव्यावृत्तवर्णाद्यात्मके जातिव्यक्ती वर्णादिनियत-प्रतिभासप्रतीतिप्रसङ्गात् । व्यक्तेरेवासौ प्रतिभास इति चेत् कोऽपरस्तर्हि सामान्यस्यानुगताकार इति चेत् ।

ननु वर्णसंस्थाने विरहय्य किमपरमनुगामि विद्यते । जातिव्यक्त्योः समवायबलाद्विभावितविभागयोः क्षीरोदकयोरिव परस्परमिश्रणेन प्रतिपत्तेरिति चेत् । न तर्हि सामान्यविशेषयोरेकतरस्यापि रूपं गृहीतं । स्वरूपाग्रहणेऽनयोरप्यग्रहणमिति निरालम्बनैव सा तादृशी प्रतिपत्तिरिति परमार्थ आवेदितस्तावत्निरालम्बनया च प्रतीत्या व्यवस्थाप्यमानं सामान्यं सुव्यवस्थापितं । तस्मादविशेष्यासिद्धापि नायमसिद्धो हेतुः । सपक्षे वर्त्तमानो विरुद्ध इत्यपि न मन्तव्यः । अनैकान्तिकताप्यस्य न सम्भावनाम् अर्हति। असद्व्यवहारानपेक्षत्वेन हि दृश्यानुपलम्भो व्याप्तः । यदि हि सन्नपि तच्च न प्रवर्त्तयेत् । इह सापेक्षः स्यात् । ततो विपक्षाद्व्यापकविरुद्धावरुद्धात् । व्यावर्त्तमानोऽसद्व्यवहारे विश्राम्यतीति अतस्तेनासद्व्यवहारेणानुपलम्भो व्याप्यत इति कुतोऽनेकान्तः । ततश्च म एवार्थः समायातः ।

एतासु पञ्चस्ववभासनीषु
प्रत्यक्षबोधे स्फुटमङ्कुरीषु ।

17158

साधारणं षष्ठमिहेक्षते यः
शृङ्गं शिरस्यात्मन ईक्षते सः ॥ इति ॥
सर्व्वस्य च पूर्व्वोक्तस्यायं परमार्थः ।
प्रत्यक्षप्रतिभासि वर्त्म न पञ्चस्वङ्गुलीषु स्थितं
सामान्यं प्रतिभासते न च विकल्पाकारबुद्धौ तथा ।
ता एवास्फुटमूर्त्तयोच हि विभासन्ते न जातिस्ततः
सादृश्यभ्रमकारणौ पुनरिमावेकोपलब्धिध्वनी इति ॥

सामान्यसिद्धिदूषणदिक्प्रसारिता ॥ ३ ॥

कृतिरियं पण्डिताशोकस्य ॥ ० ॥

# अन्तर्व्याप्तिसमर्थनम्।

ॐ नमो बुद्धाय।

इह सत्त्वमर्थक्रियाकारित्वं तदितरसत्त्वलक्षणायोगात्। तच्च क्रमयौगपद्याभ्यां व्याप्तं परस्परव्यवच्छेदलक्षणत्वादनयोः। प्रकारान्तरेण करणासम्भवात्। क्रमयौगपद्ये चाक्षणिकत्वे न स्तः। पूर्व्वापरकालयोरविचलितैकस्वभावस्य कर्त्तृत्वाकर्त्तृत्वे विरुद्धधर्म्मद्वयायोगात्।

तच्च न तावत् क्रमः क्रमाणामेकैकं प्रति पूर्वापरकालयोः कर्त्तृत्वाकर्त्तृत्वापत्तेः। एवं सर्व्वक्रमाभावात् केवलं सकलकार्य्ययौगपद्यमवशिष्यते। तच्च स्फुटतरः पूर्व्वापरकालयोः कर्त्तृत्वाकर्त्तृत्वप्रसङ्गः। विरुद्धे च कर्त्तृत्वाकर्त्तृत्वे एकधर्म्मिणि न सम्भवतः। एकस्वभावश्च तावत्कालमक्षणिक इति सिद्ध एतस्मिन् क्रमयौगपद्ययोरयोगः। तदेवमक्षणिके व्यापकानुपलब्ध्या निषिद्धं सत्त्वं क्षणिक एवा[व]तिष्ठते इति क्षणिकत्वेन व्याप्तं। तत्तेन व्याप्तं यत् यच्च धर्म्मिणि सिध्यति तच्च क्षणिकत्वं प्रसाधयति। इदमेवेदानीं

विचार्य्यते । केयं (केयं) व्याप्तिर्ग्रहीतव्या दृष्टान्तधर्म्मिणि साध्यधर्म्मिणि वा । केचिदाहुः । दृष्टान्तधर्म्मिण्येव धूमवत् । अन्यथा साधनवैफल्यं स्यात् । उभयधर्म्मसिद्धि-(द्धे)रनान्तरीयकत्वात् व्याप्तिसिद्धेः । नहि महानससिद्धायामग्निधूमयोर्व्याप्तौ पुनरग्निसिद्धये धूमलिङ्गमन्विष्यत इति । तथाहि ।

दृष्टान्ते गृह्यते व्याप्तिर्धर्म्मयोस्तत्र दृष्टयोः ।
हेतुमात्रस्य दृष्टस्य व्याप्तिः पक्षे तु गम्यते ॥
सा च सर्व्वोपसंहारात् सामान्यमवलम्बते ।
तस्य धर्म्मिणि वृत्तिस्तु प्रतीयेतानुमानतः ॥

प्रत्यक्षदृष्टयोर्वह्निधूमयोः कार्य्यकारणभावसिद्धौ तयोर्व्याप्तिसिद्धिरिति प्रत्यक्षसिद्धे वह्नौ युक्तमनुमानवैफल्यम् । नैवं व्याप्तिसिद्धेः प्राक् प्रमाणान्तरसिद्धं धर्म्मिणि क्षणिकत्वम् । साधनधर्म्ममेव तु केवलमनुपश्यन्तो विपर्य्यये बाधकप्रमाणबलात्तस्य क्षणिकत्वेन व्याप्तिं प्रतीमः । तत्ततः साधनवैफल्यम् । वैफल्यमेव, क्षणिकत्वव्याप्तस्य सत्त्वस्य तथात्वेन धर्म्मिणि प्रतीतौ क्षणिकत्वस्यापि प्रतीतेरिति चेत् । न । सर्व्वोपसंहारवती हि व्याप्तिः साध्यसिद्धेरङ्गम् । तदियमनपेक्षितधर्म्मिविशेषं साधनधर्म्ममात्रमवलम्बते । तद्यथा ।

यत्र धूमस्तत्राग्निरिति । न पुनर्यत्र महानसे धूमस्तत्राग्निरिति । एवमिहापि यत् सत्तत्क्षणिकमिति व्याप्तिप्रतीतौ साधनधर्म्मस्यापि धर्म्मिणि सत्त्वं नान्तर्भवति । किं पुनः साध्यधर्म्मस्य । तस्मात् सत्त्वसामान्यस्य साधनधर्म्मस्य पक्षधर्म्मत्वं व्याप्तिश्चैकशः प्रतिपाद्य तदुभयसामर्थ्यात् साध्यधर्म्मस्य धर्म्मिणि वृत्तिः प्रतीयत इति कुतोऽनुमानवैफल्यं । यद्येवं व्याप्तिप्रतीतावसति धर्म्मिणि परामर्शे साध्यधर्म्मिणि व्याप्तिग्रहणमिति । कुतः । तत्र दृष्टस्य सत्त्वस्य व्याप्तिप्रतीतेः । यथा महानसदृष्टाग्निधूमयोर्व्याप्तिग्रहे दृष्टान्तधर्म्मिणि व्याप्तिग्रहणमुच्यते । न हि व्याप्तिग्रहणे महानसपरामर्शोऽस्तीत्युक्तं । ननु व्याप्तिपक्षधर्म्मत्वयोरेकशः प्रतीतावपि यस्यैव पक्षधर्म्मत्वमवगतन्तस्यैव साध्येन व्याप्तिरवसितेति सामर्थ्यात् साध्यसत्ताकथनमवैयर्थ्यं साधनस्य ।

ननु न पक्षधर्म्मत्वगतिः साध्यगतिः साध्यधर्म्मसंस्पर्शात् । नापि व्याप्तिप्रतीतिरेव साध्यसिद्धिः । सामान्यालम्बनतया धर्म्मिविशेषेण धर्म्मयोरनवच्छेदात् । अन्यथा विशेषयोर्व्याप्तिप्रसङ्गात् तदयं व्यस्तविषयः सामर्थ्यादिति हेतुनिर्देशः । अथ हेतोस्त्रैरूप्यपरिच्छेदसामर्थ्यात् साध्यप्रतीतिरुत्पद्यत इत्युच्यते । न

तर्हीदानीं व्यर्थोहेतुः। स्वरूपनिश्चयेन साध्यनिश्चयोपजननात्। न हि क्वचिदियत्ताधिकं लिङ्गस्य कर्त्तव्यमस्तीति।

अपि च गृहीते पक्षधर्म्मत्वे सम्बन्धे च स्मृते अनुमानं भवद्भिरिष्यते। तद्वदन्तर्व्याप्तावपीष्यतां। न हि बहिर्व्याप्तिवादिनामपि विस्मृतायां व्याप्तौ अनुमानप्रवृत्तिरस्ति। तच्च यस्यैव पक्षधर्म्मत्वमवगतं तस्यैव साध्यधर्म्मेण व्याप्तिस्मृतेः किन्न सर्व्वानुमानवैयर्थ्यं। साध्यधर्म्मिणोऽपरामर्शेण व्याप्तेः स्मरणादिति चेत्। साध्यधर्म्मिणि दृष्टस्यैव व्याप्तिस्मरणे कथं साध्यधर्म्मिणोऽपरामर्शः। सामान्यालम्बनत्वाद्व्याप्तेः। साध्यधर्म्मिणोऽनवच्छेदादिति चेत्। ननु तच्च दृष्टस्य कथं तेनानवच्छेदः। तेनावच्छिन्नस्य वा असाधारणत्वात् कथं व्याप्तिः। अयोगव्यवच्छेदेन विशेषणान्नासाधारणतेति चेत् तथापि किन्न साध्यधर्म्मी परामृश्यते। यत्र यत्र पर्व्वते धूमस्तत्र तत्राग्निर्यथा महानस इति सामान्यालम्बनायां व्याप्तौ धर्म्मिविशेषपरामर्शस्यानङ्गत्वादिति चेत् युक्तमेतत् साध्यधर्म्मिणा ह्ययोगव्यवच्छेदः साधनधर्म्मस्य रूपान्तरमेव पक्षधर्म्मत्वाख्यं। न त्वयं व्याप्तेरङ्गं। तमन्तरेणापि व्याप्तेः सामान्यालम्बनायाः परि-

च्छेदपरिसमाप्तेः कथमन्यथा दृष्टान्तधर्म्मिणि व्याप्ति-ग्रहणवार्त्तापि तदेदानीं पक्षधर्म्मत्वायोगात् पक्षधर्म्म-त्वाग्रहणात्; पक्षधर्म्मत्वग्रहणे वा तदैव साध्यमपि सामर्थ्यादसिद्धं सिद्धमिति सर्व्वानुमानवैयर्थ्यप्रसङ्गः। पश्चात्कालभाविलिङ्गज्ञानमपि च स्मृतिरेव स्यात् न प्रमाणं। तस्मात् व्याप्तेरनङ्गत्वात् पक्षधर्म्मत्वं व्याप्ति-ग्रहणे सदपि नान्तर्भवतीति पृथग्गृहीतस्मृतयोः पक्षधर्म्मत्वव्याप्त्योः सामर्थ्यादनुमेयगतिरुत्पद्यते इति। एवमवैयर्थ्यं साधनानामेषितव्यम् इति मानफल-त्वात्। तद्वत् पृथग्भूतयोः पक्षधर्म्मत्वव्याप्त्योः साम-र्थ्यादनुमानोत्पत्तिरन्तर्व्याप्तावपि किन्नेष्यते। तदिष्टौ वा कथं साधनवैयर्थ्यं। चैरूप्यगतिसामर्थ्यादनुमेय-गतिरिति हि तदुपादानशक्तिरेव सामर्थ्यमुच्यते, न तु चैरूप्यप्रतीतेरन्तर्भाव इति सर्व्वं समानं। न सर्व्वं समानं। अन्तर्व्याप्तौ हि व्याप्तिं प्रति गत्यैव पक्ष-धर्म्मत्वमवगतं अनवगते पक्षधर्म्मत्वे व्याप्तेरप्यनवगतेः। ततो व्याप्तिपूर्व्वके साधनवाक्ये पक्षधर्म्मवचनमन-र्थकमनन्तर्व्याप्तौ। नैवं बहिर्व्याप्तौ बहिरेव व्याप्ति-ग्रहणात्। अत्राह,—

"येन तेन क्रमेणात्र प्रयुक्ते साधने सति।

अवेत्य पक्षधर्म्मत्वं पश्चाद्व्याप्तिः प्रतीयते ॥
प्रत्यक्ष इव दृष्टान्ते तच्च सेत्यन्यथा कथं ।
द्वौ दृष्ट्वा विघ्न इति चेद् व्याप्तेः प्राक् द्वयदृक् कथं ॥"

व्याप्तिपक्षधर्म्मत्वे हि स्ववाक्याभ्यां येन तेन प्रयुक्ताभ्यां सूच्येते न तु साक्षात् प्रतीयेते । वाचः स्वयमप्रमाणत्वात् । यदाह,—

"शक्तस्य सूचकं हेतुर्वचोऽशक्तमपि स्वयमिति ।

सूचितयोऽस्तु तयोः सत्त्वे हेतौ प्रथमतरपक्षधर्म्मत्वविषयमेव प्रमाणमभिमुखीभवतु । तेन प्रमाणेन धर्म्मिणि सिद्धस्य सत्त्वस्य पश्चाद्व्याप्तिः प्रमाणान्तरेण गृह्यत इति कस्य वैयर्थ्यमिति । प्रत्यक्षेऽपि दृष्टान्तधर्म्मिणि प्रथमं हेतुर्गृह्यते पश्चाद्व्याप्तिरित्येष एव क्रमः अन्यथा दृष्टान्तधर्म्मिणि व्याप्तिर्गृहीतेत्येतदेव न स्यात् । दृष्टान्तधर्म्मिण्यदृष्टस्यैव हेतोर्व्याप्तिग्रहणात् । यद्येवं साध्यधर्म्मोऽपि व्याप्तिग्रहणाधिकरणे धर्म्मिणि ग्रहीतव्य एव यथा वह्निधूमयोरिति चेत् । न । तच्च दृष्टस्य हेतोर्विपक्षे बाधकवृत्तिमत्त्वादेव व्याप्तिसिद्धेः । ज्ञातश्चैवं न खलु व्याप्तिग्रहणात् प्राक् क्षणिकस्य क्वचिदपि सिद्धिरस्ति तस्यानुमेयत्वात् । असिद्धायाश्च व्याप्तावनुमानाप्रवृत्तेः । साधनान्तरस्य च तदर्थमननु-

सरणात् । अनुसरणेऽप्यनवस्था स्यात् । अवस्थाने तावत् प्रयासस्य वैयर्थ्यात् । विपर्यये व्याप्तिबलादेव व्याप्तिसिद्धेरविघातात् । वह्निधूमयोस्तु नादृष्टयोः कार्य्यकारणभावसिद्धेः । तत्सिद्धौ न विपक्षे बाधकवृत्तिरिति दृयदर्शनव्यपेक्षा । वह्निधूमयोर्व्याप्तिसिद्धिः सत्त्वक्षणिकत्वयोस्तु नैवं । यथोक्तन्यायेन व्याप्तिसिद्धेः । तस्मात् सत्त्वमात्रस्य तत्र धर्म्मिणि सिद्धस्य बाधकवशाद्व्याप्तिः सेत्स्यतीत्येषितव्यं । तद्वदन्तर्व्याप्तावपि । ते इमे व्याप्तिपक्षधर्म्मत्वे स्वस्वप्रमाणव्यवच्छेद्यसाधनवाक्ये न तु केवलं सूचयितव्ये । न चान्यतरवाक्येन शक्यमुभयं सूचयितुमिति कुतोऽन्यतरवाक्यवैयर्थ्यं ॥

एकस्यैव हि धर्म्मस्य क्रमात्त्रैरूप्यनिश्चयः ।
विस्मृतावनुमाभावात् तत् किं व्यर्थानुमाखिलेति ॥

अपि च संग्रहश्लोकः,—

बाधकात् साध्यसिद्धिश्चेद्यर्थो हेत्वन्तरग्रहः ।
बाधकात्तदसिद्धिश्चेद्यर्थो धर्म्मयन्तरग्रहः ॥

यदि हि धर्म्मिणि व्याप्तिः सिध्यन्त्येव साध्यसिद्धिमन्तर्भावयति । ननु लाभ एवैषः । व्याप्तिप्रसाधकादेव प्रमाणात् साध्यसिद्धेः सत्त्वहेत्वपाश्रयणप्रयासस्य

निरसनात् । न हि व्यसनमेवैतच्चिह्नान्तरानुसरणं नाम । अथ न व्याप्तिसाधकात् साध्यसिद्धिः । न तर्ह्य-न्तर्व्याप्तौ हेतुवैयर्थ्यमिति किमकाण्डकातरतया बहु-तरमायासमाविशसि । द्वयं हि भवतः साध्यं दृष्टान्त-धर्म्मिणि वृत्तिः साध्यधर्म्मिणि च । यथाक्रमं व्याप्तिपक्ष-धर्म्मत्वयोः सिद्ध्यर्थं । ननु यदा प्रतिनियते धर्म्मिणि विवादः, तद्बहिर्भूते च धर्म्मिणि व्याप्तिग्रहणं तदानीं भवेद्वैयर्थ्यं । यदा तु वस्तुमात्रे विवादः तदा सर्व्व-वस्तुषु हेतोर्वृत्तित्वयापि साध्या मयापि चेति कतम-स्मिन् धर्म्मिणि हेतोर्वृत्तिसाधनं मम व्यर्थं भविष्यति । कथमिदानीं बहिर्व्याप्तिर्विवादाधिकरणं भूत एवान्यत-मस्मिन् व्याप्तिसाधनात् । तावन्मात्रलक्षणत्वाच्च साध्य-धर्म्मिणः । बाधकं प्रमाणं प्रवर्त्तमानमन्तर्गतमपि धर्म्मिणं बहिष्करोतीति चेत् एतदेव कथं भवतु बाधकेन प्रवर्त्त-मानेनैव तस्मिन् साध्यसाधनात् । साध्यसंशयोपगमे साध्यधर्म्मिणि लक्षणोपगमादिति चेत् अयुक्तमेतत् । बाधकमात्रात् न साध्यसिद्धिरित्यस्मिन्पक्षे धर्म्मान्तर-परिग्रहवैयर्थ्याभिधानात् । बाधकात् साध्यसिद्धिरि-त्यस्मिंस्तु पक्षे साधनवैयर्थ्यमापादितं । तस्माद्बाधक-मात्रेण साध्यासिद्धौ न क्वचित् सन्देहनिवृत्तिः । सन्दे-

हानिवृत्तौ न वहिष्करणमवहिष्कृतश्च साध्यधर्म्मेवेति तच्च व्याप्तिरन्तर्व्याप्तिरेव नेदानीं बहिर्व्याप्तेर्वार्त्तापि । तदियं बहिर्व्याप्तिरमुस्मिन् पक्षे कथं भवति यदि प्रतिनियते धर्म्मिणि विवादः । तद्बहिर्भूते च धर्म्मिणि व्याप्तिग्रहणमभवति । तच्च दुरुद्धरः धर्म्मान्तरपरिग्रहवैयर्थ्यदोषः । बाधकमात्रेण तु साध्यसिद्धौ हेत्यन्तरमेव व्यर्थं । अपि च सत्वहेतोर्विशेषेण न वहिर्व्याप्तिसम्भवः ।

असिद्धे धर्म्मिणः सत्त्वे विवादानवतारतः ।
तचासिद्धस्य च व्याप्तिग्रहणे साध्यधर्म्मिणि ॥
व्याप्तिग्रहः कथं नस्याद्दृष्टान्तेऽपि न वा भवेत् ॥

यच्च हि धर्म्मिणि दृष्टस्य हेतोर्व्याप्तिः प्रतीयते तच्च तस्य व्याप्तिग्रहणमाख्यायते । दृष्टश्च साध्यधर्म्मिणि सत्त्वमन्यथा विमत्ययोगादिति कथं नान्तर्व्याप्तिः ।

तथापि साधनवैयर्थ्यनिषेधाय बहिरेव गृह्णीम इति चेत् तत् किमिदानीं त्वदिच्छानुरोधात् धर्म्मिणि हेतोर्दर्शनमदर्शनमस्तु । दर्शनविशेषे वा बहिरेव व्याप्तिग्रहणव्यवस्थास्तु । उभयच दृष्टस्य व्याप्तिग्रहणेऽप्यस्ति बहिर्व्याप्तिभाग इति चेत् । ननु किमर्थमियान् भागो यत्नेन संरक्ष्यते ।

माभूत् हेतुवैयर्थ्यमिति चेत् । ननु यदि बाधकवृत्तिमात्रेण व्याप्तिग्रहणाधिकरणे धर्म्मिणि साध्यसिद्धेः साधनवैयर्थ्यमन्तर्व्याप्तौ तदेतद्बहिर्व्याप्तावपि तुल्यं । तस्माद् व्यसनमात्रं बहिर्व्याप्तिग्रहणे विशेषेण सत्त्वे हेतौ केवलं जड़धियामेव नियमेन दृष्टान्तसापेक्षः साधनप्रयोगः परितोषाय जायते । तेषामेवानुग्रहार्थमाचार्य्यो दृष्टान्तमुपादत्ते ।

यत् सत्तत्क्षणिकं यथा घट इति । पटुमतयस्तु नैवं दृष्टान्तमपेक्षन्ते ।

"तस्माद्दृष्टान्तरोक्तेभ्यो घटं दृष्टान्तमब्रवीत् ।
तथा मानेष्ववैयर्थ्यादन्तर्व्याप्तावपीष्यताम् ॥
इत्यन्तरश्लोकः ॥

कथमिदानीं अनुमेये सत्त्वमेव सपक्ष एव सत्त्वमसपक्षे वासत्त्वमेव निश्चितमिति हेतोस्त्रैरूप्यमवगन्तव्यम् ।

"मतौ सपक्षासपक्षौ साध्यधर्म्मयुतायुतौ ।
सत्त्वासत्त्वे तच्च हेतोस्ते ग्राह्ये यच्च तच्च वा ॥"

साध्यधर्म्मयुक्तः सर्व्वः सामान्येन सपक्षः, अतद्युक्तश्चासपक्ष इति । तस्मिन् सपक्ष एव सत्त्वमसपक्षे चासत्त्वमेव यथाक्रममन्वयव्यतिरेकौ तौ पुनर्यच्च तच्च वा धर्म्मिणि ग्रहीतव्यौ यच्च शक्यौ ग्रहीतुम् ।

तदिह सत्त्वस्य सर्व्वतोऽक्षणिकाद्यावृत्तौ बाधकबलात् सिद्धायां यत् सत्तत् क्षणिकमेवेति अन्वयः साध्यधर्म्मिण्यवगृह्यते। तच्च दृष्टस्य हेतोर्व्याप्तिग्रहणात् धर्म्यन्तरासम्भवात्। सम्भवेऽपि तदनुसरणवैयर्थ्यात्। यद्येवमसाधारणो नाम कथमनैकान्तिक उक्तः॥

असाधारणतां हेतुदोषम्मूढव्यपेक्षया॥
अब्रवीदग्रहाद्व्याप्ति(प्ते)र्नैवं सर्व्वोपसंहृतौ॥

उक्तमेतज्जड़धियो धर्म्यन्तर एव व्याप्तिग्रहणं प्रतिपन्नाः। तदभिमानापेक्षयाऽसाधारणमनैकान्तिकमाह आवणत्वं दृष्टान्ताभावात्। साध्यधर्म्मिणि च व्याप्तिरनिष्टेरगृहीतायां व्याप्तौ सन्दिग्धोभयतयाऽनिश्चयकरत्वात्। अथवा असाधारणतैव श्रावणत्वस्य मूढ़ाभिमानोपकल्पिता। दृष्टैव हि शब्दव्यक्तिधर्म्मिणी विवाहाधिकरणात्। अन्यथा धर्म्म्यसिद्धिप्रसङ्गाच्च। दृष्टाश्शब्दव्यक्तिसाधारणश्च श्रावणत्वं हेतुः। धूमसामावत्। ततः सर्व्वोपसंहारवत्याः व्याप्तेः सम्भवात् त्वादिवदृष्टमेव साधनं श्रावणत्वाख्यं। क्रमयोगधानुपलम्भ एव चाच बाधकं प्रमाणं। श्रोत्रज्ञानजनधमेव हि श्रावणत्वं। तस्मान्मूढव्यपेक्षयाऽसाधारणात्। असाधारणस्य सर्व्वोपसंहारायोगात्। साध्य-

धर्म्मिणि व्याप्तिप्रतीतावेव साध्यप्रतीतेः साधनवैफल्यं स्यादेव । तन्माभूद्वैफल्यमिति नैव व्याप्तिर्ग्रहीतव्या । तस्यामगृहीतायां सन्दिग्धोभयतया स्यादनैकान्तिकत्वं। सर्व्वोपसंहारेण तु व्याप्तिग्रहणे यथोक्तन्यायेन साधनवैफल्याभावात् । अदुष्टं सत्त्वादि साधनमेवेति वेदितव्यम् । तदेवमुभयथा मूढजनापेक्षयाऽसाधारणमनैकान्तिकमुक्तम् ।

समानञ्चैतद्बहिर्व्याप्तिवादिनामपि यदि हि मूढमतापेक्षा न स्यात् स्यादेव श्रावणत्वमदुष्टो हेतुः । सत्वादिवन्नियतशब्देषु हि विवादे शब्दान्तरं स्यात् ।

दृष्टान्तः सर्व्वशब्देषु विगतौ बाधकं प्रमाणं प्रवर्त्तमानं अदृष्टान्तमपि तच्चैकं दृष्टान्तयतीति कथम साधारणमनैकान्तिकं वेति । ० ।

अन्तर्व्याप्तिसमर्थनं समाप्तमिति ॥ ० ॥

कृतिरियं रत्नाकरशान्तिपादानामिति ॥ ० ॥

00047158

Digitized with financial assistance from

on 10 July, 2018